~~त्यविध्युद्देश्यतावच्छेदकाक्रांतत्वंतत्वमित्युक्तौतुनविशेषः~~अप्रवृत्तवित्तविध्युद्देश्यतावच्छेदकाक्रांतत्वंपरिनिष्ठितत्वमितित्व
संभवग्रस्तमतस्मादुक्तरीतिरेवयुक्तेतिदिक् इतितदाहेतिडिगिति।इतरेतरद्वंद्वेबहुवचनापत्तेराहसमेतियत्तुदंडेज्ञापकात्सुबंता
फा तद्धितोत्पत्तेस्तत्रप्रातिपदिकाधिकारोव्यर्थइतिशंकामाहतन्नेतिध्वन्यन्यनशंकतेननुइतिव्यर्थइतिसर्वत्रव्यर्थइत्यर्थः।ननुप्राति राम:
१७०
पदिकार्थादौप्रथमाविधेस्तत्रादोषेपिपचतिपश्येत्यादौक्रियायाःकर्मादिमत्वेनतद्वाचकतिङंतात्द्वितीयाद्यापत्तिरतआहतिङंताति
ति।संख्येतिसंख्यावच्छिन्नेऽन्यसंख्याभावादित्यर्थः औत्सर्गिकैकवचनंतु ंगंमकेसत्येवा।किंचैवंसर्वतिङंतेसुबंतत्वेनैवपदत्वसिद्धे

292

सुप्तिङन्तमित्यत्रतिङ्ग्रहणंवैयर्थ्यापत्तेरिति भावः।ननन्यसंख्याभावेपितत्संख्योमाद्वायसादत आह संख्येतिद्योतकविषयेप्युक्ता
र्थानोमितिन्यायप्रवृत्तेरिभंतिभावः।एतेनवाक्यात्सुबुत्पत्तिनिरासाय्यसइत्यपास्तम्।ननुएवमपिधातुभ्यःसुपोऽभावायसोऽत्त
आह धातुभ्यइति।ननुएवमपिसुबंतेभ्यस्तद्धितनिवृत्त्यर्थःसो त आह तस्येति।आदिनातेनेत्यादिपरिग्रहः।नन्वेवमपितस्येत्यादिना
समर्थविभक्तेरनिर्द्देशेनतिङन्तात्तद्धितव्यावृत्त्यर्थःसोऽत आह तमवितिएवंचसुबंतादिष्टत्वेनतिङन्तादिष्टानप्रत्ययाभावेनवक्तद्वैय
र्थ्यमेव तदाह नतेभ्यइतिसुबंततिङन्तेभ्यइत्यर्थः।एतेनवाक्यादत्पंतसार्थिकनिरासार्थःसइतिकोस्तुभाद्युक्तमपास्तंतत्तदभावेःप्राति
पदिकापेक्षाभावे।ननुसुबुत्पत्तेःप्राक्केवलप्रातिपदिकादेवतद्धितोत्पत्त्यर्थसोऽत आह स्वार्थेति।संस्कृतस्य।क्रमेणेत्यादिः।हेखंतरमा
हतस्येति।प्रथमोद्भ्रादित्याद्वादावहवोप्यादिति।प्रथमादित्यसप्तावत्यर्थेतंव्यापारइतिभावः।इत्याद्यर्थेस्येतिपाठः।सार्थकेतनेनार्तांतरखा
र्थिकादिनिरासः।एवंचकेवलप्रातिपदिकात्तद्धितविधानंदुर्वचमितिभावः।घटकतयोपस्थितप्रातिपदिकविशेषणलाभावायाह प्राधा
न्यादिति।उपस्थितेतितउक्तहेतुद्वयेनेतिभावः।ननुतदधिकारेपिप्राधान्याभावात्कथंतद्विशेषणत्वमत आह तदर्थीतितत्।अनुदा

शे०टी० तादेरित्येतत्। तथा च सन्पायोऽत्र बाध्यते तेन इति भावः। तन्वेवमपि स्वांगशिष्टामित्याद्युदात्त एव सर्वेशाद् इतीष्टासिद्धिरेवात आह सर्वेति।
१२१ ननु तत्र पाठ एव नमानमिति चेन्नात्रत्यभाष्यस्य सार्वइत्यंतं तत्प्रयोगस्य च मानत्वात् सर्वस्य सपीतारंभाच्च तदाह स्पष्टमिति लुकस्या
१८९ निप्रत्ययनिमित्तकार्यापेक्षया लगादेः प्राबल्यबोधकोन्यापइत्याशयेनाशंकते नन्वेति। प्रत्ययात् अजः तस्य अनुदात्तादेरित्यस्य न दोषः
अत नापत्तिर्न एवमग्रेपि. धमेति: अन्यायबोधकप्रत्ययोतरेति सूत्रस्थमपर्यंतग्रहणानुवृत्तिरूपप्रमाणादित्यर्थः। अस्ति हि लल
तमित्यादौ तु कांतरंगत्वमावेकवचन इत्यस्य निमित्तविनाशकता न लुकि विभक्तिपरत्वाभावात् तदाह अंतरंगेति। विनाशकस्यैव लुकोपी
त्यर्थः एतेम तदविनाशकव्यावृत्तिरपि नासमासादिग्रहः। तन्वेवमत्रापि लुकि न लुमतेति निषेधे न सुप्परत्वाभावात्सर्वस्य सुपीत्यप्रादया
तत्वमस्त्येवेति न्यायविषयतया दोषाभाव एव तु आह सर्वस्येति। इत्यत्र इत्यादौ तदंतसप्तमीत्वात् तदंतसप्तमीत्वमिति सिद्धांतांगीकारा रामः १२१
२४ त्। तथा च विशेष्यानुरोधेन षष्ठ्यर्थे सप्तमीमंगीकृत्य सुबंतस्यातस्यैर्थे न विभिशब्दकार्यत्वं तदाह प्रसपेइति तस्य। लुकः ननूक्त सिद्धा
तस्यतत्रानंगीकारोऽत आहात एवेति तदंगीकारादेवेत्यर्थः सर्वस्तोमो तिरात्र इति श्रुतौ तथा पाठादाह सर्वेति आद्युदात्तत्वेति पूर्वप

दप्रकृतिस्वरेणेत्यादिः अन्यथा बहुव्रीह्यादिकालेतोदात्तत्वात्पूर्वपदप्रकृतिस्वरेण तत्स्यैवातिदेशः स्यान्नाद्युदात्तस्येति भावः। ननु गर्गादिभ्य
इत्यादौ तत्प्रकृतिकषष्ठ्यन्तादित्यर्थस्य लक्षणयांगीकार आवश्यकत्वेनानदातादेरित्यत्रापि तथैवास्त्वित्याशयेनाशंकते नवेति। मा
नेति तत्र संभवादिति भावः इदं च प्राचामनुरोधेन तद्ध्वनयन् सिद्धान्तमाह वस्तुत इति। तत्रापि गर्गादिभ्य इत्यादावपि न लक्षणेति अ
न्यथा निर्वाहे उपपन्नवृत्तिकल्पनाया अन्याय्यत्वात्। तमेव प्रकारमाह। गर्गेति। सूत्रे समर्थानां मध्ये प्रथमोच्चारितवाच्यादित्यादिः
तद्वाचेति सुप्त्यैवेत्यर्थः॥ नन्वेवं तस्मादित्यस्य बाधे सुबन्तप्रकृत्यन्तरादिव्यवायेपि स्यादत आह त[illegible]तीति। उक्तहेतुद्वयेन
सुब्व्यवायांगीकारेपि तस्मादित्यनयात दन्यव्यवायवारणं तद्बाधे मानाभावात्। अट्कुप्वाङितिवदिति भावः। नन्वप्रसिद्धोयं प्रकार
इति लक्षणैवोचिता इत आह तत्त्वे इति। उक्तार्थकथनमित्यर्थः तत्र हि विभागारोपस्य संतीत्यत्र मतुप्कृतो नेति शंकापास्तमवयवादसा
मर्थ्येन समुदायस्य प्रातिपदिकत्वेन वारणपरभाष्यव्याख्यावसरे ननु प्रातिपदिकप्रकृतिकसुबन्तात्प्रत्यय इत्यस्य प्रातिपदिकत्वादित्यसु
क्तमसुबन्तत्वादिति वक्तुं युक्तमिति चेन्नः सुबन्तत्वादिति वक्तुं युक्तमिति चेन्न सुबं। तात्प्रत्ययोत्पत्तिः समर्थात्प्रत्ययः प्रातिपदिकात्तु प

नि

शे०टी० रः श्रूयत इत्येवमाश्रयणेन सुबंत समुदायस्य समासग्रहणकृ. तयमेनवारेणतथोक्तेरितितेनोक्तं। किंचतदधिकाराभावेसमर्था
१५२ नामित्यादिसुबंतस्यैव विशेषणं स्यात सैवोपस्थितत्वात्। तथाच कृतसंधिकार्यात तस्मात दुक्ततोभानवद् इत्याद्यसिध्धापतिः लु
१९० का आकारसहितस्य निवृत्तेः तदधिकारेतु तत्समर्थ्यातस्यैव तद्विशेषणं एवंचातरंगेतिन्यायाविषयांश एव परिनिष्ठितत्वमत
ह इत्यादावेकादेशात्माकृटापोलुकु इति बोध्यं तदाह तस्य चेति। उद्योतादवित्यर्थः लिंगेतिलिंगबोधकप्रत्ययविशिष्टस्यापीत्य
र्थः कुमारश्रमणादिभिरित्यादिज्ञापकस्य विशेषायेक्षत्वाद्विशेषग्रहणे एव प्रवृत्तिरितिप्रकाशादिग्रंथासंगतिसूचयितुमाहेयं ए
चेति। उक्तपरिभाषा चेत्यर्थः आद्ये हेतुमाहनयेति एतस्याश्च सत्यानार्थो ज्याद्युग्रहणेने ति भावः द्वितीये हेतुमाह विशेषेति अयस्कु
मीत्यादीत्यर्थः नन्वेतावता नयविशिष्टप्रातिपदिकत्वातिदेशत्वाभेपि बहुव्रीहिरितिसूत्रभाष्यासंगतिरेवात आह यद्यपीति। अनेनानुक्त ना [illegible]
वचनेन अतएव। उभयग्रहणे प्रवृत्तो भयधर्मातिदेशत्वाभावेव आपादित इत्यत्रान्वयः सकविति॥ नघृत्रस्येति कश्चित्यर्थः। अन्यथा १५२
तत्व्याप्यधर्मानतिदेशो ।नघंतानामिति। नघंतप्रकृतिकसुबंतोत्तरपदको बहुव्रीहिरित्यर्थः चोवाक्यालंकारे। इत्यन्तात्। अज्ञाता

296

शंकायांतथैवपरिहारस्तुचितइतिभावः। ननुसमासांतविधौनेतिङ्याप्सूत्रभाष्यविरोधोस्याभाष्यविरोधोस्यभाष्यस्यातआहसमेति
त्तदितिमूलोक्तेयर्थः। एवमग्रेपि। समुदायेसत्ययतदित्यादिः तदंशेसमुदायांशेइत्याशयइति। उक्तभाष्यस्येतिशेषः॥ तथाचतदे
वतत्रनिपासकं। अतएवस्वस्वरविधावेवसमाससंघातग्रहणेतत्रदोषोक्तेरितिभावः। ननूक्तफलायङ्याप्ग्रहणेपिउङ्तादाव
निर्वाहोः तआहङ्याविति। सिद्धिअत्रविशिष्टा [illegible] तद्धितसिद्धिः अन्यथालोहितिकेत्यादिवदादावेवस्यादितिभावः। आदिनायुवतिके
त्यादिपरिग्रहः। ननुपुंवद्भावाद्ध्रस्वत्वंविप्रतिषेधेनेतिवार्तिकेदारदइत्यत्रपुंवद्भावावकाशमदर्शनपरभाष्यमाण्येनकप्रत्ययस्या
पितसिलादिषुपाठावश्यकत्वाद्युवतिकायुन[illegible]तरेत्यत्रपुंवद्भावान्नकश्चिद्विशेषोत [illegible] आहजातेरिति। नन्वेषांनजातिवाचकत्वम
तआहवयोवेतितत्रस्त्रीप्रत्ययांतातद्धितोत्पत्त्यंगीकारेतिप्रसंगोऽतआहतद्धितेतितद्धितग्रहणंचेत्यर्थः। आदिनाइत्वंतस्वा।र्थिकपरि
ग्रहः। व्याख्यानादिति। लक्ष्यसिध्यनुरोधरूपादित्यर्थः। पूनीतिरिति। उक्तार्थेतिन्यायस्तुस्त्रीप्रत्ययप्रकरणेनेतिभावः। एवंचेतिलक्ष्यानु
रोधेनतस्यातरन्यपरत्वेनेत्यर्थः॥ आरभ्येतानेनतसमासांतपरिग्रहः पठितेष्वितिशेषः। व्याख्यानादितिङ्याब्ग्रहणस्यस्त्रीप्रत्ययमात्रोप

१२

१२

शे०टी० लक्षणत्वस्य प्रत्याख्यानानुरोधे नावश्यकत्वेन तद्भिन्नतद्धितेष्वेव तेन ग्रहणमिति सूत्रमतेऽपि यूनस्तिरित्यत्र तदसंबंधः॥ अत्यंत
१२३ स्वार्थिकादिषु तु तेषामतिक्तार्थाभावेन परिपू र्णमिति न्यायाविषयतया सुबंता तद्धित इति सिद्धांतस्य ज्ञायो: प्राकूमदन्ते श्चाभावा: तदसं
१९९ बंधः न त्वार्थाभावेनैत्येव सिद्धिरिति रिक्ते त्याधिकमिति वाच्यं॥ ऽप्रत्यय इति महासंज्ञानुपपत्तेः प्रकृत्यर्थापेक्षया ऽन्यः परं वाच्योद्योत्येवानास्ती
त्यत्यन्यदेन तद्भावित्यादिवच्च नान्यतरवैयर्थ्यं अत एव स्वार्थिक इति तत्र व्यवहारः अत्यंतत्वं तु कुत्साद्यप्रवेशेनेत्यर्थः उक्तार्थे ज्ञा
पकं सूत्रमपि तु मा ह्मत एवेति॥ तत्र तदसंबंधादेवेत्यर्थः॥ उक्तार्थे सूत्रद्वयभाष्याभ्यामपि दृढयति॥ अत्यंतेत्यादि सिद्धिरित्यंतेन सुबु
त्पत्तेः ज्याबुत्पत्तेश्चेत्यपि बोध्यं॥ प्रयोजनमित्यस्य द्विर्वचनाभाव इत्यनेनान्वयः॥ तत्र हि भाष्यादौ हि तच्च भाष्यमाह द्वित्वेति पादोर्थे मा
स्य एकत्वेति तद्धितांतं बोध्येत्यादिः पदत्वाभावादिति पदवाच्यस्य वीप्सायामभावात् तद्धितस्तु अत्यंतस्वार्थिकत्वात्तु वक्ष्यतेः पूर्वमेवे राम:
तिभावः प्राग्गिति॥ तदनंतरं तु तेनोक्तत्वान्वेति बोध्यं एतत्तेषां ततः प्राकूमवंतत्र हि सांकृदिनमित्यत्र हि॥ परिभाषाऽभावे इति शेषः॥ १२३
इनुपीति [illegible] नुणीत्यर्थः कृदन्यातोरिति शेषः अण् अ अणिनुण् इत्यनिनक्रमविवक्षयाऽस्य पूर्वनिपातः स्वार्थिकत्वेन अत्यंतस्य॥

२९८

थिकानां सुव्युत्पत्तेः पूर्वमेवोत्पत्तेः॥ विभक्तेस्तु स्वार्थे बहिर्भूतसंख्यादिद्योतकत्वेनास्वार्थिकत्वेन अत्यंतस्वार्थिकानां सुव्युत्पत्तेः पूर्वमेवोत्पत्ते॥ वि
भक्तेस्तु स्वार्थे बहिर्भूतसंख्यादिद्योतकत्वेनास्वार्थिकत्वात् बहिरंगत्वमिति भावः इदं भाष्योक्तं सुबंतात्तदनुत्पत्तावेव संभवति नान्यथ्यात तदा
हतस्यापीति। अत्यंतस्वार्थिकाणोपि अपिः समाससमुच्चायकः विशिष्टादितिरुद्ग्रहण इति न्यायेनेति भावः। एवमग्रेपि। रूपेति समित्यस्य स्वद्घ्ये
त्तिभावः गतिकारेतिपरिभाषांगीकारे तु न दोष इत्याह प्रागिति। उक्तेति अणाद्यनुणंतत्वरूपाधिकपदार्थप्रापेक्षतया बहिरंगतया तन्निरू
पितांतरंगत्वादित्यर्थः एवं च तत्र तदसंबंध एव। अत एव ङ्याब्ग्रहणासत्तदर्थत्वे समासांते पुंदोषः स्वार्थिकत्वेनोक्ताशयेन परित्यक्ता
कथं कालिकेत्यादिकृतशंकोत्थितिः लोहितिकेति सिद्धिस्तु वचनेनैव अत्यंतस्वार्थिकतस्यादेरपि ङ्याबाद्यंतादनभिधानमेव सत्यभि
धानेएतिकेत्येव एवं चोक्तन्यायेनैव सिद्धो ङ्याब्ग्रहणं व्यर्थमेव। किंच समासांतप्रकरणे प्रातिपदिकस्याप्यसंबंधः तस्यामवस्थायां वा
ति कयस्यात्प्रातिपदिकत्वादिदिकृतदाहेत्य न चेति। गुरुशेखरे दोषे घाताद्वान्वितार्थः यत्तु स्वौजसमौङित्यत्र पृथक्यदानीति प्रकाशः तन्नबहू
नांलुकल्पनेनांगतिकगतिच्छंदसत्वकल्पनेन च गौरवापत्तेः यदपि इतरद्वंद्व इति रत्नाकरः॥ तदपि न वहुवचनस्य सौत्रत्वात्तेलुकि

299

१३

शे०टी०
१७४
१९२
धास्प
९ म

गोरवापतेरत्त आहसूत्रेइति।ननुसंज्ञायाःकार्यार्थत्वेनात्रतदभावेनकथंसेत्याशयेनाशंकतेनन्वेति॥ननुलोपमात्रंफलिकेत्तं
ज्ञांभेअकार्यत्वोपइति तस्यलोपइतिसूत्रभाष्योक्तः।अन्यथाकाम्यचःकस्यापित्तत्वापतेरतआहतत्र ततिअवर्णा।सोऽङ्गसोश स्त्र
इत्यादावित्यर्थः।यथास्पष्टतमम्अन्याचरितार्थानांचरितार्थोच्चारणानामेषांवर्णानांलोपेति।लोपफलकंयदित्वंतत्स्वीकारेइत्यर्थः।तथा
चयत्रलोपेसतितद्वैयर्थ्यंतत्रतदनंगीकारइत्युक्तभाष्यार्थः।अतएवकाम्यजादौनाप्रतिसत्तदाह काम्येति।तन्मात्रेतिलोपमात्रेत्यर्थः।तस्या
नुच्चारणेनापिसिद्धेरितिभावः।विभक्तिश्चेत्यस्यमध्येउक्तत्वेसंगतिमाहनचीतिजसादिषुसादेःप्राप्तेत्संज्ञाभावायवक्ष्यमाणेत्यादिः
अपिर्विरोधेअन्यथाचकाराभावेयोगपद्यंतुएकसंज्ञाधिकारेणबाधितं।अन्यतरबाधापिनवचनग्रहयमाण्यात्अतआहपर्याय
इति।नन्वेवंत्रीणित्यस्यानुवृत्तावष्टनआवीत्यादौनिर्वाहेपिप्रथमयोरित्यादौदोषोऽतआहप्रथमेति।वाच्ययोरित्यस्यत्रिकयोरिति राम: १७४
शेषः।व्याख्यानादित्यस्यार्थमाहान्यथेति।तयोरग्रहणेइत्यर्थः॥ननुअचीत्यनुवृत्तेरावश्यकत्वात्सावेरितिदुर्वचमतआहौजसो
रिती।किंचःतस्मा [illegible]तइतिलिंगमप्यत्रबोध्यं।विननुविभक्तिप्रदेशेषुसुप्तिङ्पदाभ्यामेवव्यवहारेकिंविभक्तिसंज्ञयेत्यतआ

पधस

K K S U LIBRARY
RAMTEK
441 106
M-1862
Dist Nagpur

300

हविभेति।नापतेरितित्तेषांमाग्दिशीयत्वेनविभक्तित्वेपिसुप्तिङ्भिन्नत्वात्।ननुएवंतेषामपिसुप्संज्ञास्त्वित्यतआहतेषामिति।प्राग्दि
शीयानामित्यर्थः।प्राग्दिशःसुविभक्तिन्यासेनेतिभावः।तिङ्संज्ञातुनकृतातरंतातरबाधापत्तेः।रामइहेत्यादौनिघातापत्तेश्चेतिरिदि
क्।प्रथमशब्दादीनांतत्ववारणायाहस्त्रीलिंगादिति।हगिकारादिनिरासायाहवैयाकेति॥एतद्ग्रंथमात्रनिरासायाहास्मिन्निति।
कारकप्रकरणादाविति भावः।प्रत्याहारादितिसप्तमीबहुवचनंनतुएकस्यानेकसंज्ञाबाधवैयर्थ्यापत्तेः।अन्वययोग्यत्वायाहषष्ठी
तिस्वौजसिति।सामान्यसूत्रेणासिद्धेः।सामान्यसूत्रेणसिद्धत्वाद।हनियमेति।बहुष्वितिसूत्रभाष्यप्रामाण्यादाश्रितइतिएकद्विकत्वश
ब्दान्यविषयमिति।तत्रेति।ध्वनयन्नाहेत्यादिनासंख्यापरोलक्षणया।एवमेवगोत्रस्यबहुषुलोपिनोबहुवचनं।तस्यप्रवृत्तौद्व्येक
योरनुगितिगोत्रेलुगचीतिसूत्रस्थवार्तिकवयोगेयिबोध्यंवार्थइतिसूत्रभाष्यध्वनितएकादिनाद्वंद्वाभावास्तुलोकेमुख्यसंख्येय
परत्वयामसिद्धविषयइतिनतद्भाष्यविरोधः।तत्रोद्योतेद्व्येकेषामितिप्रयोगस्तुआर्षवार्तिकप्रयोगानुवादइतिनदोषइतिबो
ध्यं।इहसूत्रेइत्यस्यफलमाहलौकिकेति।अतएवतत्प्रयुक्तः।भाष्यादीतिसंख्येयासन्नेतिसूत्रभाष्यादीत्यर्थः।प्रायइत्यस्यफल

Ⓑ Accession No. ~~2931~~ M-1862

Title - लघुशब्देन्दुशेखर टीका.

टी. :- चिदस्थिमाला.

KKSU LIBRARY
RAMTEK
441 106
M-1862
Dist. Nagpur

Checked 2012

शे०टी०
१७५
१९३

माहक्वचिदिति।आरोपेणशब्दार्थेसंख्यायांअत्रमानंसूचयितुमाहतएवेतिनन्वेवमव्ययादिभ्योनस्यात्संख्याभावादतआहे
केतिउत्सर्गइतिसामान्यसूत्रमित्यर्थः।द्विवचनोद्विबहुवचनेइत्यपरंकार्यमितिभावः।क्वचेतिवचस्यप्रयोगेत्वर्थेद्व्येकयोरितिसा
हर्याद्बहुशब्दस्यापिसंख्यापरत्वमितिसूचयितुमाहबहूति।अत्रसूत्रे।एतेनलोकेप्यागवदितिसूचितं।व्यापकेति।अल्पतमसंख्येत्यादिः
एतावतैवबहुत्वेसंख्याव्यवहारः।एतेनबहवइत्युक्तेकतीतिसंख्याविशेषाकांक्षायाजायमानत्वेनबहुत्वस्यानियतपरिच्छेदक
त्वाभावान्नसंख्यात्वमित्यपास्तं।नन्वेवंबहुवचनासंगतिरतआहबहुत्वेतितत्फलमाहतेनेति।बहुःपर्वतइत्यादौनचतत्रप
रत्वात्एकवचनंस्वौजमितिवाक्येबहुत्वेचतस्यैवपरत्वात्।आदिनागुणः।नयोश्चनियामकत्वेनतदेकवाक्यत्वात्।एतेनतथानि
र्वाह्येद्विबहुवचनानांव्यर्थमितिकौस्तुभाष्युक्तमपास्तं।नन्वेवंदाराइत्यादौआश्रयैकत्वात्तन्नस्यादतआहदाराइति।पूर्ववैलक्ष
ण्यसूचकस्तु।आदिनागुणः।नन्वेवमेकस्मिन्नपिवृक्षेवृक्षाइतिस्यादतआहसत्वेति।आरोपश्चेत्यर्थः।कोशादपिदृढव्यवहा
रस्यमा[illegible]प्राबल्यमितिध्वनयितुमाहभर्तृदारेतिअयंस्मार्तःप्रयोगः।अंत्यःशांकरभाष्यीयः।इत्यादिरूपद्वतौविषयः।आरोपेज

राम:
१७५

वपञ्चगतबहुत्वारोपेतयावृद्धं व्यवहारादितिभावः॥ तत्रमानेसूचयति अतएवेति॥ सतितुवृद्धव्यवहारेतथाभवत्येवेत्यादिष्टेनेति
॥ त्तदनसारेणतदारोपेणेत्यर्थः आदिना आचार्याः कथयन्तीत्यादिसंग्रहः॥ नन्वेकवचनादिसंज्ञानांरूढत्वेऽर्थप्रत्ययनियमदभेदेन
दोषावारणायसूत्रद्वयावश्यकत्वेपिनान्वर्थत्वेऽनआह॥ अन्वर्थेति॥ एकदेशोत्रसुबंतस्यतदाहसुबंतेतिति॥ कार्यकालपक्षेचेदंसू
त्रात् उत्तरसूत्रात् अपकर्षस्यभाष्याप्यनारूढत्वादाहसर्वमिति अतएवात्रात्रभाष्येतदहनुक्तिः सरूपाण्येवेतीतिनतुविरूपाणी
त्यर्थः ननुऔजसादिषुसरूपत्वाभावादेवनातिप्रसंगोऽतआहभ्यामीतितदादावित्यर्थः औजसादिषुवैरूप्यात्॥ एवकारस्यान्व
पितावच्छेदकावच्छेदेनान्वयेतात्पर्यग्राहकत्वेननतस्योत्सर्गित्वेनचविभक्तित्वावच्छेदेनसारूप्यान्वयलाभात् अन्यत्वेनैवशब्दस्यारसे
नसामानाधिकरण्येनसस्याद्वस्तुतः सर्व्यार्थएवेति स्पष्टंभाष्येइतिभावः नन्वेनमुपस्थितत्वात्तदवच्छेदेनतज्ज्ञानेतद्व्यार्थमित्या
शयेन समाधत्तेहरिणेति॥ पुंवदितिभस्याढेइत्यादिना॥ आदिनाकयजादि॥ ननुपरनिमित्तत्वेनबहिरंगतयादीर्घादीनामसिद्धत्वादे
वकारापकर्षादावपितयोस्तत्रैकशेषोदुर्वारएवातआहलौकिकइति॥ सारूप्येतस्याङ्गत्वलक्षणत्वेनतत्रानिमित्तत्वफलमाह एके

१५

गं

शे०टी
१२६
१९८

तिवस्तुत्वेनैतदपवादत्वव्यवहारोस्यान्यत्रस्पष्टः अत एवावैरूप्यमपि प्रातिपदिकांशे एव च संज्ञासर्वनाम्नो प्रथमाद्योरेकशेषः अन्यथा जसि
प्रथमे इति वैरूप्यान्न स्यादिति बोध्यं आकारकस्येत्यनेन विभक्त्यंतं तत्तत्सूचितासमभिव्याहृतानेकपदप्रयोगरूपात्तात्पर्यग्राह
कात्साहित्यानवच्छिन्नतयोपस्थितेः अत्र भिन्नानि शाब्दज्ञानानि भिन्नाश्चात्तदर्थोपस्थितयः प्रत्येकान्वयविषयः समूहालंबनात्म
कोवंधः अनेकज्ञानयौगपद्यस्यापि पातंजलैरंगीकारात् इति भावः तदाह सर्वत्रेति प्रत्येकमिति शेषः ननु चात्र ज्ञातशास्त्रीयैकशेषेणे
वनिर्वाहः तथा सति एकशेषेतरद्वंद्वमर्यादयेतरनिवृत्तिपूर्वकावस्थितेरेव प्रतीत्या लोपादिस्थल इव शिष्यमाणस्यैव लक्ष्यमाणार्थो
निधायकत्वावश्यकत्वेनैकपदजन्यैकोपस्थितिविषयाणां पुष्पवंतादिपदवदेकत्रान्वयस्यैवोचित्येन न विभक्त्यर्थव्यासज्यवृत्तिसंख्या
न्वयेनान्वयितावच्छेदकधर्मावश्यकत्वेन साहित्यभानावश्यकतया चात्रानेकत्रान्वयस्य [illegible] दुरुपपादत्वात् इति भावः। तुल्यरूपत्वे तितात
दुक्तं अक्षादिषु यथा भिन्नाभक्षिभञ्जिदिविक्रियाः प्रयोगकालाभेदेपि प्रतिभेदंस्थ्यकृस्थित्ताः अक्षाणां तंत्रिणां तंत्रत्रपायस्तुल्यरूपते
ति। एतेन तुल्यरूपत्वे सत्यनेकार्थबोधकत्वं तल्लक्षणं सूचितं। एकशेषाविषयोदाहरणमाह एवं च मिति उक्तवत् इत्यर्थः। दृष्यपीत्य

रामः
१२६

स्पभवतितंत्रेणेतिशेषः नन्वत्र [illegible] ।वास्तवतंत्रव्यवहारः तत्रत्कारकशक्तिमतांभिन्नक्रियान्वयितयाबोधेनश्रोतुरनेकानुसंधानाद्बो
धेनाशतेरेवतात्त्विकत्वात्।अनेकार्थस्थलेतात्पर्यग्राहकप्रकरणादीनांक्रमेणज्ञानात्क्रमेणोपस्थितेबोधेचावृत्तिव्यवहारांगीका
रात्।उच्चारणैक्यमात्रेणतुतंत्रव्यवहारोगौणोऽतआह।तंत्रमिति।यत्तुअर्थभेदेइतिमतेसकृत्ताल्वोष्ठपुटव्यापाराद्विनिगमनाविर
हेणानेकशब्दानांभेदापन्हवेनोच्चारणमित्यार्थः।अर्थभेदेपिशब्दैक्यमितिमतेताल्वोष्ठपुटव्यापारप्रकाशितैकशब्दैनेकवृंतगता
नेकफलन्यायेनानेकार्थसंबद्धेनानेकार्थबोधादर्थतंत्रमिवित्तन्नअक्षादिस्थलेउपपत्याशब्दभेदेपिलोकानांभेदाप्रतीतेःपटादि
ष्वर्थभेदाभावेनोपपत्यापिभेदाभावात्बोधृभिरनेकशब्दज्ञानाननुभवाच्चात्आहशब्दस्येतिमतद्वयेपीत्यादिः।शब्दार्थव्यतिरेकसत्वा
दितिभावः तत्सहत्वे।शब्दस्यपर्यायपरिवृत्तिसहत्वेउभयत्रापिसकृदनुसंहितेकशब्देनयुगपदनेकार्थबोधः।तत्रतयोरायोदाहरणमध्ये
।अस्याशयउक्तः इदमुभयमपिप्रातिपदिकतंत्रं एकक्रियादावेवान्वयसत्वेतदुक्तंचवृद्धैःसकृदुच्चरितःशब्दःदर्थंगमयतीति।तदाहान्वा
यीतितथान्वक्वचिद्विभक्त्यं ततंत्रमनेकज्ञानयोगपद्यंचक्वचित्प्रातिपदिकतंत्रंसमूहात्मकमेकमेवतदर्थज्ञानंचेत्यत्रान्वय्यने

शब्दभेद

न्वेष

शे०टी० कपदसमभिव्याहारस्तादृशैकपदसमभिव्याहारश्चनिपापकइतिबोध्यं तत्फलंतुनिपफलंतुप्रत्यर्थैति: अक्षाणजेतामक्षादीव्यंता
१२१ मित्यादावर्थमर्थप्रतीत्यर्थः अपिरर्थादर्थौप्रतीत्यादिवक्ष्यमाणसमुच्चायकः अतएवाह कदाचिदिति। तत्राद्येबीजस्यसत्त्वेएवोक्त
१९५ त्वादंत्यंप्रमाणयतिअतएवेति। सहविवक्षाविषयत्वादेवेत्यर्थः असहविवक्षायामप्येकशेषेतुतत्राप्यसावकाशत ॥ निरवकाश
त्वाभावेनभाष्योक्तिरसंगतास्यादितिभावः। तत्रैवदोषांतरमाह किं।चेतिनत्वस्त्येतोउक्तनियमश्चेत्तो अन्यअसहविवक्षायामेवेति
नन्वेवसहविवक्षायांतत्रापतिरतआह सहेतिइत्यादीत्यस्पष्टमेवेत्यत्रान्वयः एकशेषेतुबहुवचनद्विवचनापतिरितिभावः
भक्तिप्रह्वविलोकनप्रणयिनीनीलोत्पलस्पर्धिनीध्यानालंबनतांसमाधिनिरतेनिहितप्राप्तये। लावण्यस्यमहानिधीरसिक
तांलक्ष्मीदृशौस्तन्वतीयुष्माकंकुरुतांभवार्तिशमनंनेत्रेतनुर्वाहरेः॥ विद्वन्मानसहंसवैरिकमलासंकोचदीप्तद्युतेदुर्गामार्ग राम: १२१
णानीललोहितसमित्स्वीकारवैश्वानर। सत्यप्रीतिविधानदक्षविजयप्राग्भावभीमप्रभोसाम्राज्यंवरवीरवत्सरशतंवैरिंचमुच्चैः
क्रियाः अत्रविदुषांमानसाभिन्नमानसाधिकरणकत्वंसेत्याद्यर्थः। तत्रशास्त्रीयप्रयोगविरोधंपरिहरतिनन्वेतिइत्येवब्रूयादिति

६

भावःगौरवमितिप्र त पतौ गौरवमित्यर्थः नभयाश्रयणादिति भावः आश्रयेणेनेति पूर्वान्वयिनन्नुपात्ति कद्वंद्वनिवृत्तिः फलमुक्तमेवेति
कथंनमस्याख्यानमत आह्नाभेकमिति तत्रसाहित्येननेकशेषस्यसह विवक्षाविषयत्वेकथ्यमन्यत्रतदुक्तिरत आह द्विरिति आदिनास
वीदीपत्यादितंत्र परइतिसमानफल कत्वातल्लक्षकद्वइत्यर्थः असहविवक्षायांविभक्त्यं ततंत्रांगीकारादिति भावः तत्रापि विशेषसिद्धां
तभूतमाहसचोक्त्वेति अनन्यार्थकग्रहणेनयस्यांविभक्तावेकशेषस्तस्यांविभक्तौसरूपाणामित्यर्थेनभ्यामादावेकशेषोनौजसादा
वितिखंडनकारोक्तिंपयःपयोनयतीत्यत्रवारणायसहविवक्षायामेवैकशेषइत्यर्थलाभायैवैकग्रहणमितिरत्नाकरोक्तिंचखंड
पतिएकेतिस्पष्टार्थमित्यस्याव्याख्याएकस्यामपीति यत्तुसाभाहारद्वंद्वविषये. पितृतौच्चित्यसंकोचेमानाभावात्‌ अन्यथाघट
घटमित्यस्यसाधुतापत्तेः अनभिधानेन्नमानसूत्रानर्थक्यापत्तिश्चघटघटावित्यस्यापिनतएववारणात्‌ नघटमित्यतइत्य
नःसमूहाप्र तीत्याकथमेकशेषःतत्राशिप्रकरणादिगमकवशातत्प्रतीतौवाधकाभावात्‌ अन्यथाऽनेकब्राह्मणंभोजयेतिसा
मानाधिकरण्यानुपपत्तिःअतएवनब्राह्मणंहन्यादित्यादौव्यक्तिपक्षेऽनेकब्राह्मणहननादावपिप्रत्यवायःशास्त्रकृत्तामिष्टः

९०

रो०टी० समूहस्यप्राधान्यादेकवचनंनान्वयस्तुतत्र बाधात्व्यक्तिष्विवब्राह्मणानांशतं भोज्यतामितिवत्इतिरत्नाकरोक्ततत्वंज्ञयति
१२८ समाहारेतिएकवदितिनपुंसकमनपुंसकेनेत्येवसमाहारेतरेतराभ्यांतदिदंवस्त्रंतानीमानिवस्त्राणीत्यादिसिद्ध्यातद्वैय
१९६ र्थ्यादितिभावः एतेनोक्तज्ञापकादितरेतरद्वंद्वविषयेतद्विधानेपिसमाहारद्वंद्व। विषयेऽपवादाभावात्पटमितिद्वंद्वाप वा
त्तिः नन्वदिक्षुसमाहारस्येवात्राप्यनभिधानात्तदभावइतिचेत्तत्रसमाहरणस्यबाधवदत्रतदभावादित्याशंक्याबकारा
पकर्षेणसरूपाणामेकशेषएकवृत्तिर्नान्येतिव्याख्यानेनतद्ध्या। इतिसिद्धिरितिमंदोक्तमपास्तंउक्तयुक्तेरेवापकर्षेच्च
र्थेइतिस्वपूर्वग्रंथविरोधापत्तेः तदपकर्षसाफल्यस्यान्यथाप्यागुक्तत्वात् पौनःपुन्यंपौनःपुनिकइत्यादौतद्धितवृत्तेमा
तृमातृभ्यांमातृमात्रोरित्यादौद्वंद्वस्यचानापत्तेश्चेतिदिक्। अनेकब्राह्मणमित्यादौतद्धितवृत्तेमातृमातृभ्यांमातृमात्रोरित्या राम १२८
दौद्वंद्वस्यचानापत्तेश्चेतिदिक्। ~~अनेकब्राह्मणमित्यादौलक्षणयासामानाधिकरण्यंबोध्यंशेषषष्ठ्यानिवृत्तिम~~
द्वस्थानवाचीतिरत्नाकराद्यसांगत्यायाहेकेचित्एतल्लक्षणयामाना। धिकरण्यंबोध्यंशेषषष्ठ्यानिवृत्तिमदवस्थान
सा

ध

वा। वीरत्नाकराद्यसांगत्वापाहैकेति एतत्स्वज्यो एवद्रूतिभावः इष्टयुक्तिफलमाहैकेति तुभेति शेषपूरणं द्वस्यकर्मसानत्वेतु
मसंतं भावसाधनत्वेतु प्रङ्संत्तमित्यर्थः। तत्वाएकपदार्थी। अन्यथायदार्थैकदेशत्वान्नस्यात् तत्रतयोर्मध्येनान्वेवं कंथवे।
धङ्त आहतन्नेति निवृत्तेलौपव क्षाख्नीयत्वे सतीत्यर्थः। लक्षणेतिमतसंग्रहायाह वृत्तेति एतेनतत्स्मरणाद्वोध इतिनि
स्तं उक्तयुक्तेः प्रत्ययानामिति व्युत्पत्तिभंगापतेः एकशेषशास्त्रमज्ञानतोबोधानापतेश्च अनेकेति तत्फलानुकूलत्वेनप्र
त्ताराद्युवयवानामित्यर्थः। निवृत्तेति शाब्दशक्तिसाभाव्येन धातुवान्यक्तिपायास्तत्तः कर्त्रीदिभेदेपि निवृत्तभेदाया एवप्रती
तेरिति भावः। संख्यापरतयाआह विवक्षेत्यपीति एतावदिति तन्मन्नत्यर्थः। एक इति अंतरंतमइत्यर्थः। तदाहतथाचेतिअ
न्यतरसाम्यमादायान्यतरादेशवदुभयसाम्यमादायासोपिस[illegible]ज्ञेत्यर्थः। उभयोक्तौ शंकतेनचेति आद्यशेषसेष्टत्वादा
हकदाचिदिति अनन्यत्वातिप्रसंगं निराचष्टे एकादीति एकश्चेकश्चद्वौ वद्वौ न्वेत्यादानिति भावः। अभ्यर्हितत्वादुपस्थिति
क्रमाद्वा एकशेषं शब्दस्य पूर्वनिपातः। गर्गा इत्यादौ पितुरेकत्वात्प्रकृतिरेकाप्यत्रस्तु बहवः प्राप्नुवंतिपक्षापितयाप्रिय

१२ ..

शे०टी० १२९ १९७

ञित्पत्रव्यक्तैकत्वविवक्षयाते वारणीयार तदाहेत्पन्नमिति। आप्यनुवृत्ति फलमाह तेनेति अत एवाह प्रसयेतीति चामरादा
विस्वें। तोदात्तत्वापतिरनुदात्तस्तुसः यकुवुदुषः प्रत्ययस्येति वाच्ये योगषिभागादनित्यमिदं ते नचुचुपादेनेत्वमितिरत्नाक॰
रास्तन्न भाष्यानुक्तत्वात तद्ध्वनयन्नाह नुनुवतितु स्त्रीपे आह परे तिङादेरित्यनापलोपदेश पदान्नुवृत्तिरितित्ततात्स
यंतस्य खंडितत्वाच्चाविरत्वोप्यवमित्वाभावइति बोध्यं। अत एवत्वयुक्तविभक्तित्वादेव नव्यादृतिसूचिताः रुचिमाह भाषात्वि
ननु तथ्येव कुत्तोनो क्रमत आहाम्यनेति प्रागदिशीयभिन्नेइत्यर्थः इन्द्रेदित्यादौ यथास्यामवृत्तिस्तथात्रैव शेखरेइत्युक्तम्
वोवाक्यालंकारे लोपासिद्धत्वं वहिरंगतयाः एतेन तथ्यास्यस्त्विदंङयाद्युक्तमप्यास्तंवा ध्यविशेषचिंतागीकारे रामकमाहातए
वृत्तिउक्तत्वायांगीकारादेवेत्यर्थः नद्वेयष्ठीमिति अत्रीत्यनुवृत्तौवा धकाभावादित्यर्थः॥ ननु अनंतरानित्यस्यप्रतिपक्षिणिवा राम: १२९
च्येतयोक्तिरयुक्ताऽत आहानंतरे तथ्या चोतद्दलमप्यवहितापेक्षं नव्यवहितापेक्षमिति भावः ननुतुल्ययुक्त्यामंवितसंज्ञाव
तरं तसंज्ञाभावायत्तदावश्यकमत आह संबुद्धाविति व्यवहारात सोन्वात्ततरं तस्येति तथ्याहि सति एङ्ह्रस्वादित्यत्रागांक्षेपास

भवेनन्हेक तरदित्यस्यासिद्धिः एतेनतदर्थंतदितिशास्त्रिरङ्याघुक्तंसामंवितमित्यन्वत्वामनोरमासमूलाचेत्या अन्वर्थसंज्ञा
त्ववतद्धेस्य स्यापितुल्यत्वात्सापित्पयमाचसेवेतिसीकारादितिशास्त्रमुक्तंचापास्तंत ध्वनन्यन्नाहतस्मादितिकार्षकात
पक्षेणाहसंवुद्धिरितिअंशेइतिअंगसंज्ञासूत्रपटकेतथैः परिभाषायांतदंशस्यप्रत्ययइत्यंतयोगविभागेनसनदंशमूलकता
तदाहप्रत्यय इतिशेषमाहगत्वेति ठपेतित्वअयमेवत्वात्राक्षेपपदार्थः। तथाचतद्विशेषणत्वमेङादेरितितदंतविधिःतद
ताशास्तुनप्रत्ययग्रहणइतिनिषेधात्इदमेवसत्वयितुमत्रांगसंज्ञासत्वानुन्यासः ननुप्रसिद्धाक्षेपएवास्तुकुतोनातआह
नुमानेनतस्यारि तेत्वमपिनिरस्तंप्रत्यातिवैविन्येणावतानुपस्थितस्यापिप्रायःशब्दे ऽन्वयसंभवादाह पातेतिदोषांतरमाहकिं
चेतिप्रयोगइतिशेषः अतएवाहशास्त्रेइति अतएवउक्तहेतुद्वयादेवसत्रेइत्यस्यसमाहितंभाष्येइत्यात्रान्वयः प्रत्ययइतिस
सम्यंतंआशंक्येतितदंतविधिनाविशिष्टस्यप्रत्ययांतत्वादितिभावः यत्रप्रत्ययोनिमित्तत्वेनाश्रीयतेतत्रतदाघंशस्यैवोप
स्थितिर्नतदंतांशस्यइयस्थितपूर्वस्यैवावधित्वेनान्वयेनापंचम्याइतिनिषेधादित्याहयस्मादिति एवंचविशिष्टस्यनम

श०टी०
१८०
१२८

खयांतत्वमितिनोक्तदोषइति भावः समाहितं एकदेशिएतेनतत्र परस्मैप्रति अंगप्रत्ययसंज्ञा भादिति भाष्यमुपादायप्रकृ
त्तिमंतरेणप्रत्ययस्याभावात् द्विष्ठौ निमित्तत्वेनाश्रयणाच्च प्रकृतिः प्रत्ययनिमित्तंप्रत्यये परतोंगसंज्ञाविधानादंगंप्रत्यया
पेक्षंतत्रान्यतरस्मिन्नुपादीयमानेऽव्यभिचारादितराक्षेपइति कैयटोक्तमपास्तं भाष्ये तु स्वरूपकथनपरमेवदृष्टांतार्थमि
तिबोध्यंतदाहेतिदिगितितस्यैवांग पदार्थत्वादाहेनेति तस्यविशेषंमूले समूलयति हल्ङ्याबिति ह्रस्वांतप्रकृतिरि
त्याह प्रकृत्येति अंगात् एङः ताद्ध्रस्वांताच्चोक्तार्थात् हेकांतरदित्यत्र तावताप्यदोषान् प्रांचां मतेनाह्वोभयत इति सिद्धां
ततेतदभावादाहतत्स्वीकारेपीति उभयतआश्रयणेऽतादिवद्भावस्वीकारेपीत्यर्थः तेनाभेदातिदेशानाह ह्रस्वेति ननु स्था
निरूपातिदेशेनतत्संभवोऽत आह ताद्रूप्येति पत्न उभयत आश्रयणेंतादिवत्त्वाभावात् हे ज्ञानेत्यादौ परत्वात्पूर्वरूपे ह्रस्वा
त्परसंबुद्ध्यभावान्मलोपो न स्यादित्येतदर्थंतथाव्याख्यानंतदाहिहस्वग्रहणं हलो विशेषणं न संबुद्धेरिति नोभयत आ
श्रयणमतेनङ्यापः सोरिति निष्कर्षः परास्तइति शास्त्रीततवंङयन्नाह एतदर्थमेवेति अस्यार्थमाह मस्येति उक्तरीत्या

राम:
१८०

तिभावः। ननु हस्वांतांगत्वमंतवद्भावेनलौकिकेनैकदेशेतिन्यायेनसंबुद्धित्वमस्यातआहार्थेतितन्नपुनविकारेणवतलप्स्यतेः
अपिपूर्वसमुच्चयेहेलंतरमाहैकेतिक्रमसत्वान्नानुपपत्तिःयेनविधिस्तिस्यत्रभाष्यकेपदयोर्ध्वनितमिदं। ननुशास्त्रीयोस्तुसःत
स्यतत्रापिएरूरित्यादौप्रवृत्तेरतआहेमत्कारस्येतिनोव्युत्क्रमेअतएवउभयोरवृत्तेरेवाए तेननतदप्रवृत्तत्यर्थ्यपूर्वग्रहणमिति
शास्त्युक्तमपास्तंसिद्धांतेशंकतेनन्वेतिअलविधित्वेनास्यानल्विधावितिनिषेधादितिशेषोनेतस्यसबुद्धित्वस्यअलितिअ
।लुङ्हस्यकविधेयत्ताकत्वाभावादितपर्यः।तस्येत्स्यस्यसंबुद्धिसंज्ञास्तत्रस्येत्यर्थेतुयथाश्रुतमेवसाधुतथावतस्माअपिविशिष्टे
सत्वेनास्यसुतरामनल्विधित्वमितिभावः एतेननुकारीत्यासाफल्येनतत्वेपिसंज्ञाकृतबहिरंगत्वाभावादाहपरेतिपूर्वम
तरंगपरंबहिरंगमितिभावः। ननुएवमपीना सहितस्येत्तस्यसंबोधनेलोपानापत्तिरतआहसमेतिअनेननहेशब्दमति
क्रांतोऽतिहेसत्तदादिपरिग्रहः प्रत्येतिएतेनतदर्थमेदूस्वग्रहणमावश्यकमेवेतिदंज्यातमपास्तं। अतएवमूलेहेविष्णो
इतिप्रत्युदाहरणांतरंदत्तंइतिएतेनह्रस्वांतादिहितस्येत्यर्थेनगणेज्ञातेपिनक्षतिरितिप्रश्नइतिशास्त्युक्तमपास्तंहे

313

रू

ग्रह

शे०टी०
१८१
१८१

लेक्ष्मीत्यादावव्याप्तेः परिभाषाबाध्योमानाभावाच्च ननुएवमपिगुणेकृतेसंनिपातपरिभाषयालोपोनस्यादिवएङ्ग्रहणस्यसेद्धा
दोषावकाशत्वादतआहसामर्थ्यादिवेतिप्रत्याहारेणसामर्थ्यादिवेत्यर्थः सेप्रभृत्यर्थेत्वेङ्ग्रहणमेवकार्यमित्युक्तमेवस्मृत
वित्यादीनांत्वनभिधानमेवेतिभावः नन्वङःशेतेदप्रवृत्तावपिरामङ्त्यस्त्वह्रस्वग्रहणस्यसावकाशत्वेनगोरीत्यादौपर
त्वाद्धल्ङ्याबितिलोपंबाधित्वाऽबाध्येतिह्रस्वेसंबुद्धिलोपोनस्यादतआहगुणादितिअतएवह्रस्वांशेतीतितदप्रवृत्तेरेवआ
दिनाहेगौरीत्यादिपरिग्रहः एतेनस्वतःसिद्धेङ्ग्रहणार्थ्यमपितत्अतएवगुणात्संबुद्धेरित्येवसूच्यतामित्यपास्तमिति
शास्त्रमुक्तमपास्तंअसमबलत्वेनपरत्वासंभवादाहाभ्यस्त्वेतिननुतस्यापिलोपस्योक्तरीत्यान्तरंगत्वमकृतव्यूहेतितुनास्त्येवातआ त्या
ह्रस्वेनेतियद्यपिरामङ्त्यत्रापिसंबुद्धिगुणःप्राप्नोतीतिसोपिनिरवकाशस्तथापिफलाभावात्तत्रतदप्रवृत्तिरितिभावःवि
शेषमाहनपुमितिवृत्तिकाराद्युक्तमाहपूर्वसवर्णेऽतिद्विमात्रेतितदादीत्यर्थः तेनकुमारिमित्यादौत्रिमात्रसंग्रहः अत्र
कृष्णशास्त्रिदज्यत्तंयथाचिंत्यंतथाभावप्रकाशेस्पष्टं समेतिवृत्तौतुइतरोत्तरदूदूपरतयातद्विवरणंबोध्यंयत्तुचूडा

रामः
१८१

लः लोमशङ्‌ त्योपि प्रत्युदाहरणमिति शास्त्रिदंडिप्रभृतय स्तन्म तन्त्रे त्वे फलाभावात्।त ः धनयन्नाह कर्णेति यत्तु एङ्ह्रस्वादिति
वदाक्षिमप्रकृतेः पुंसीति विशेषणमिति शास्त्र्यादय स्तन्नप्रायुक्तरीत्याप्रसिद्धाप्रयासंभवात्येषपिरखो ताक्षेपः सुवचस्त
थापि तत्र गौरवादाह पुंसीती तिव्यत्ययेनेति भावः अतिखट्वानित्यादि सिद्धये आह विहितस्येति यथाश्रुतमेव ततो पिला
घवात्योजयति तन्नेतिवाक्ये करे शान्पायेन प्रयोग इति भावः रासः किंरामाः तत्पत्तमाहतेनेति अयोगवाहपदमन्वर्थमि
त्याहनविद्यते इतितत्वाच्च ते इति पाठः तदनित्यत्वादाहानुस्वेति अतएव तेषामकारोपरिपाठेनादूत्वादेव अत्र मान
माह तदुक्तमितिरषाभ्यामिति पंचम्यात त्र तदुपस्थित्यात तस्यव्यवहिते ऽ प्राप्ताविदमेकं वाक्यं विध्यर्थमित्यभिप्रेत्याहाद
र्शनेति तत्र तावद्धातिकमतेनाहातिसिकेतिनत्तु तावतापि तस्यानिवारकं किंमत आह तस्मादिति तदुपस्थितिलब्धमित्य
र्थः तदुक्तं वार्तिकहता अग्निमभाष्यविरोधं परिहरति एतदिति इत्यर्थोदित्यस्येनेति शेषः ननु नेदं सिद्धान्ताशयं का।तस्मा
देवक्ष्यमाणत्वात् तथा सत्युक्तार्थोन्नानेन शंकायामपि अग्नेत्तत्प्रकाशनस्यैवौचित्यात्स्वप्रतउभयोरप्युक्तिरन्याशयैवेतिशं

२१

शे०टी० काचतस्या अपितत्वमेवेत्याशयेन तद्धेतुमाह चुरादित्वितिगुरुत्वसंपर्ये आह प्रतियोगीतिद्व्युक्तेति तत्सामर्थ्याल्लब्धमित्य
१८२ र्थः लाघवार्थं तथान्यासे तु नोक्तार्थसिद्धिरित्याह तस्यादिति समाधानपरभाष्योक्तेरपीत्यर्थः। नायंसिद्धांतइत्याहे
२०० तदिति। इदं नो लाघवात्यथा तरं मुनीनां प्रामाण्यादेतत्खंडनापप्रवृत्तेश्च सिद्धांतमाह भाष्येतिति पाठक्रमादार्थक्र
मोबलीयानितिन्यायेनाड्व्यवायेपीति विभज्यतत्रणत्वं विधीयतिशेषः। छंदसोभिसोलुगिति सूत्रयत्राहनुमभि
रिति तदर्थमेवाहाख्येति नियमस्य सजातीयापेक्षत्वादिति भावः व्याख्यातमिति एते नोक्तरीत्या प्रयोगविभागं विनापि
निर्वाहः सुकर इतीदं युक्तं वस्तुतो व्यवहाराय पातिनकार्येउक्तज्ञापका तत्रनिर्दिष्टंगविकल्पपरिभाषोपस्थितिरद्
कुषितितु पूर्ववन्नियमार्थमिति शास्त्र्युक्तं वा यात्तं स्वरूपमिति र शास्त्रतोणादेः संज्ञाशब्दत्वावगमात् तत्र च शसेपबुप्रवृत्ति एमः
निमित्तत्वेन तस्यैव भावप्रत्ययवाच्यत्वादाहरणकार इति तदुक्तं हरिणा सामान्यान्यभिधीयंते सत्ता वा ते शेषिता। संज्ञाशब्दस्य १८
रूपं वा प्रत्यये स्वतलादिभिरिति न्यायाप्रवृत्तिरिति पाठः। न्यायानामिति पाठे विषयभेदकृतं वहु। अपितिरषाभ्यामित्यादौ

षष्ठीसमभ्याश्चमायाह तदितितस्मिन्निति त्वंशलाभबीजमाह प्रत्येतिप्रत्ययःग्रहणे चापंचम्याइतिनिषेधादत्र तग्रहणं
नानन्वन्योपकारकत्वेनद्वयोर्गुणत्वाद्गुणानामिति न्यायेनात्र परिभाषाप्रवृत्तिर्नस्यादत आह गुणइति लक्ष्यानुरोधएववक्ष्य
वस्यावीजं ननु तदादिग्रहणात्केवलप्रकृतेरंगत्वं नस्यादत आह प्रकृतीति यत्तु अत्र पस्येति चेतिलोपापत्तिः असिद्धत्वं तु
नप्राग्भाद्वीति पक्षास्युपगमात् अस्योरदितितपरकरणेन तदनित्यत्वात्तत्र स्यभत्याख्यानाच्चवस्तुतोरूपोदाहरणमेतत्
कार्योदाहरणं तु ऐयतरत्यादि स्त्री अपश्येतादृचिय ङस्यादितिशास्त्रिदं ङिम म तयस्तन्त्रेतिध्वनयन्नाह स्त्री तिज्ञा ईपनी
दिनाप्रचीइयतीत्यादौ यण् परिग्रहः ननु प्रत्यय सापेक्षत्व सापेक्षत्वमुभयोस्तुल्यमिति कथं तत्त्वमत आह तत्रेहीति अधिकेति
इवर्णस्य तत्रापिप्रथ्याकथंचिन्निमित्तत्वमस्त्येवत दपि यथावयं चिदितिभावः ननु स्त्रीशब्दात्तस्या विधानेपि सोर्विधाने नांग
त्वाद्विधिग्रहणेकृते पिदोष एव आह प्रत्येतितस्य फलान्तरमप्याहापि चेति इति ननु तदादिग्रहणफलं सूत्रोक्तमयुक्तं
तदभावेपि तत्र तदारंभसामर्थ्यादेव तत्सिद्धेः पत्तु पपगतो आभ्यां यङ्लुकि पापास्विवा पामीत्यादौ तच्च चरितार्थमिति शास्त्रिदं

नम

२२ ६

शे०टी० ङिप्रभृतयस्तन्नयङ्क्तुकश्छादंसः त्वात्तदेतत् ध्वनयन्नौत्तादिपदसंग्रहात्स्वमेवाह करोमीतिमान्वोक्तमेवाह तथासती गि
१८३ तदनुक्तमं हाकेत्वेति अ पिः सिद्धांतसमुच्चायकः प्रस्तुततोधिकस्येतिस्पष्टार्थमतिशेषोक्तिपरं न तु निषेधमती पादन्य
रं प्रत्यासत्त्या लुङादिनिमित्तांगस्यग्रहणादिति शास्त्रवदं ङिप्रभृतयस्त्वेतस्याहांगे अति अंगस्येतीति अधिकृतं तत्या
दिः मूलवच्छादं ज्याधुत्यसांगर्त्यं ध्वनयन् सिद्धांतपक्षमाहाकारादितिइदमपितदस्युपेक्षवस्तुनः स पक्ष एवायुक्तरू
ं त्याह किंचा तादिति अपिनां गाधिकारभावपक्षसमुच्चयः ननु नलुमेतिनिषेधात्कथतस्यांगत्वमलं ग्लांह ब्राह्म
णेत्यस्यापीति अपिः समुदायसमुच्चये। नलुमेत्यस्य लक्ष्यांगसंज्ञकस्य त्यार्थादनित्यत्वाद्धाऽ प्रवृत्तिस्तदाह युवोर
नेतित न हि पंचभिः क्रोष्टीभिः क्रीतं कुलं पंचक्रोष्टृ इत्युक्तं स्यत्चेदं भावमकारेणन्वत्रान्यथा वारणमत्त आहार्थे ए.मः
स्येलोविकस्येवग्रहणमिति शंकायां वक्ष्यमाणयुक्त्यंतरनिरासंगतयो सिद्धांतमुपेक्ष्याह प्रत्ययेति एवं च तयो १८३
क्तिरयुक्ते वस्यात् ननु तथापि प्रत्यासत्त्याभिसन्निरूपितांगादित्यर्थे ननोक्तदोषोऽत आह भिसइतिहियतः एवम

न्नेपिएतदर्थमेवसोरपक्षत्वेनोक्तानन्नुतत्रान्यथ्येववारणमस्तु अंगाधिकारस्यान्वान्यत्प्रयोजनंभविष्यतीत्युतआ
हेदमेवेत्तिकिंचभिस्सःप्रत्ययस्यैवग्रहणमित्यत्रनमानंतस्याःपरिभाषायालक्ष्यासंस्कारकत्वात् एवंचप्रत्यासत्तिःसर्वथादुर्ज्ञे
यासिद्धांते ऽतदर्थ्यत्वर्थेत्रवर्णग्रहणे ऽर्थवत्परिभाषायाअप्रवृत्त्यानेदसोरितिनिषेधारंभेणाचसर्वत्रसिद्धिः एवंचतद्व्याख्यानंविं
त्यमेवफलाभावात तदाहेत्य तमिति अन्यत्वात् तद्ग्राहकत्वात् सैवेतिकष्ट्यपेत्यादिनिर्देशात् प्रतिपदोक्तत्वाच्च एवेनसहत्वेक
वचनन्निरासःतस्याभिन्नादेशविधानात् नचविकल्पाः स्तुसर्वनाम्नस्यैस्मिन्नावित्येवसिद्धेङ्कसिङ्योरित्यत्रङिग्रहणवैयर्थ्यापत्तेःङे
रामित्यत्रतुस्त्रियामित्यादिनिर्देशात्तस्यैवग्रहणंतदभिप्रेत्याहव्याख्यानादितिज्ञापकमूलेयमितिसीरदेवाद्युक्तेरसांगत्यं
ध्वनयन्नाहोयज्ञीब्रेतितदुक्तार्थ्यासांगत्यंध्वनयन्नाहसंनिपातइतिपूर्वपरयोर्विशेषणविशेष्ययोःश्लेषात्पर्यः विधिरित्यत्रक
र्मणिक्तिः तद्विघातस्येत्यत्रकर्मण्यणित्याहतस्येमितिसंनिपातविघातइत्यत्रभावेघञ् एवमग्रेपिएवंचदीर्घेतिदविघातकत्वा
न्नैतत्प्रवृत्तिरितिभावःननुसंनिपातलक्षणविधिनिमित्तमितितकत्वस्यात्रांगीकारात्किमस्याअंतरंगत्वमुतपादेशस्येतिचे

३१

२३

शे॰टी॰ १८५ तत्रनाध्यस्तेत्याह्यारोपितेतिनैतस्मात्प्रवृत्तेरितिस्वरूपसद्विधायैवेतत्प्रवृत्तौनिमित्तमित्युपजीव्यविरोधस्यदुर्वारत्वादितिभावः नत्वप्रवृत्ता
ह्वकिंपेतियतद्भूतिशेषः एवमग्नेपितत्र अंतरंगेननतज्ज्ञानमेवेद तत्प्रवृत्तौनिमित्तमास्तामित्यनाद्यदोषेणसपक्षःसम्यगे
वातआहकिंत्वेतिगौरीत्यस्यहेइत्यादिःस्थानीतिआद्यसूत्रेणनियमशास्त्राणांनिषेधमुखेनप्रवृत्तिपक्षेणेदंविधिमुखे
ने नेतिसिद्धांतपक्षेतुमत्यायलक्षणेतिबोध्यंह्रस्वत्वापत्त्याबाध्येतत्यादिः तत्रहेगौरीत्यादौभाष्येत्रिनदीह्रस्वत्वंसंबुद्धिलोप
भ्र स्यानिमित्तंस्यादित्यादिकमुक्तमितिस[illegible]तसूत्रस्यभाष्ये[illegible]त्यर्थः तदसंहेगौरीत्यादौद्वितीयस्यरामायेत्यादावित्यर्थः
कथमितिअतएवपुंकूह्रस्वत्वस्यादीदपदितिभाष्यादिसंगतिरिभावः विशेषमाहकार्यस्येतिपूर्वस्येत्यर्थः सूत्रेतद्विधायके
त्रपेत्यस्यविशिष्येत्यादिः एवंचततएवेष्टसिद्धावनित्यत्वमफलमितिभावः भाष्यविरोधापत्तेरितिहेतुंसूचयन्नुक्ताश राम
येनैवाहतराबेति .. तदनाम्रहादेनेत्यर्थः समाहितमित्यत्रान्वयः अन्यथाशंकायाएकदेश्युक्तित्वेनयोजनेपिसमाधिस्त १८५
थैवबाध्यत्वेनतथातदुक्तयसंगतिःस्पष्टैवतदाहनत्वंगेतिनदितद्विधावदतस्मिन्निअंगसंज्ञेत्युक्तमित्यर्थः नन्वेव

परत्वान्मूले तदुद्धेरवरोवेन्वितोऽत आह विरोधेति परत्वेपि पाठ तस्तत्वेपि मतां तरमाह तस्येति पत्नी तानुवृत्तौ एमेष्वित्यादावना
पतेरा हेतोर्वृद्धिरिति एतेन एत्वे तदभवतीनेन अन्यथा तया तदप्रवृत्तौ तदसंगतिः स्पष्टैव एतेन सर्वेषामिति निर्देशो नैत्वे तदप्र
वृत्तिरिति। शास्त्रि दं ज्याधुत्कमपास्तं निर्दिष्टमुदाहरणमाह। रामाभ्यामिति वहु [illegible] ली
~~डिति न्यासे आह टिभाग्मपास्तं निर्दिष्टमुदाहरणमाह। रामाभ्या~~मिति वहुवचनग्रहणस्येति भावः। उक्तदोषाभावाय झलीडिति
न्यासे आह टिखिति प्राचां मते नेदं कैयटमते सिद्धांतमते च स्यानिवत्वाप्राप्तेः सर्वत्र सप्तमी निर्देशा सागत्यापत्त्या तथा क
र्तुमेव दुर्वचमिति तत्वमत एव टिखिति पाठे त्विखितिपाठे नमत्वुरद्भूतिवोध्यं नचैव कसाने चर्त्वस्य पदांतज श्त्वापवादत्वा
ज्जश्त्वोत्तरं च पन्यासो न युक्तोऽत आह वाधितेति अस्य भवती शेषः। अवसाने रूतिरलमुड्गादौ गतिस्तु अपवादो पीतिन्या
येन तातङ् न्यायेना[illegible]वावोध्याअत एवासंयोगादि त्यत्र कदुपधे भ्यइति वार्तिकखंडकस्य नवाक्यास्य नवाकाशत्वाद
प. त्रादौ गुणस्य वार्तिकस्य खंडिकापांसत्वं तत्र पदनवकाशं किकरणं गुणिं वाधते इह पुनरुभयं सावकाशमीजतुर्वर्तिते

२५

शे०ग० सादेरौ इति भाष्योक्तोक्तस्य क्वित्वे फलांतराभावः इह तु संप्रसारणविधौ कृतार्थत्वात् दुर्बलेनातिदेशेन प्राप्यमाणो गु
१५५ णनिषेधो दुर्बलत्वान्न तद्विधिना सह स्पर्धत इति तातङ्न्यायेनेति कैयटेनोक्तं द्वित्वे परसवर्णत्वमिति वार्तिकाद्द्वयो द्वित्वे
इद्दं नेति मांच स्तन्नवाकुवाणीति भाष्योदाहरणेन तस्य तत्रे पंचत्वबोधनात् दाह पूर्वत्रासिद्धीयमिति तन्त्रे स्त्रय इति पू
र्वत्र सफलं च पंचमालेबीजमाह नामीति आदिनात आमृश्णास्त्रिदं ज्या।। सुखिं स्वं ङयति यस्त्वि न्दीर्घे धुतिं दंते पुस्त्वा लिं
गानामिति नियमस्य सजातीयापेक्षत्वादिकारैकार एकारो त स्त्रीलिंगानां चेत्यर्थः यद्वा स्व ’ त इत्यादिः अत एव नतिस्त्रि
त्यस्य न वैयर्थ्यमिति वाच्यं अपिरुक्तसमुच्चयेनन्विस्यानुरोधेन तथैवात आह नदीत्वेतिमत्य तिखद्वादेः नन्वेवमपि तिस्रणामि
ति एतेन नैकृमुदाहरणं तन्नदनुवृत्त्यात त्सिद्धिरिति भाष्यद्वयविरोधेन प्राचांदीक्षितादीनामुक्तिखंडनाप्याह प्रियेतिसिद्ध इति राम:
नुडित्यर्थः तदुक्तिं निराचष्टे गौणीइति न न बहुवचनमेव तथ्येति तैरुक्तमेवात आह बह्वितितन्न तदभ्रवृतावभ्युपेत्यादिपि दोषां १५५
तरमाह नेकमिति एवमभ्युपेत्योक्तमिदानीं तस्य वैयर्थ्येपि न तस्य तदर्थत्वमिति प्रसंगगपतेरित्याह संमतिषट्चतुर इति सार्थः

तदभिमतं[illegible]मानांतभाष्यरूपमानांतरंखंडयतिनन्वांगेतिपंचम्यातदंतेनअर्थांतरभ्रमायाहगत्वेतितस्यतथात्वेसाधकंतद
ग्निमंभाष्यांतरमपितथा आहषट्प्रभृतिविहितविशेषणत्वेणातिभाव:।ननुलोकेगणनायांतदपाठात्तावतापिकथंतत्वमतस्तदाशप
यमाहष्णांतेत्यत्रेतिनिमानमितितइतितदाशयइतिशेष:।नन्वेतावतालुग्विधौतथात्वलाभेपिनात्रेत्यतआहप्रकृतेपीतिषट्च
तुर्भ्यइत्य त्रापीत्यर्थ:।तस्यैवविहितविशेषणमेव:तुल्ययुक्तेरिति।ध्वयन्नाहषड्भ्यइति आदिनासर्वनाहसर्वनाम्न:स्माइत्या
दिग्ने आदिनाजातइतितभ्दाष्यतात्पर्यमाहयद्यप्येवमितिनन्वेवंभाष्योक्तहेतो:कागतिरआहविरुद्धइतितत्रत्वेतेहेत्वंतरमाहउ
त्तरेतिनन्वेवंकैयटस्यकागतिरतआह षट्भ्यइतिहरदत्तेनोक्तिंखंडयतिनवेतिभूतपूर्वमत्याश्रयणेइतिशेष:तत्रतस्यफलमा
हतेनेतिइतिइत्यादौ एतेनकैयटानुरोधेनदीक्षितशास्त्रिदंड्याद्युक्तंमिश्रो।क्तिरखंडनायत्रक्त्यपापइत्येवसिद्धेइहस्यग्रहणसा
मर्थ्यमनुपक्षीणमेवेतिदंड्युक्तंहस्वांताद्विहितस्येत्यर्थभूतपूर्वगतिशब्देनविवक्षित:पदन्नइत्यत्रशसप्रभृतिविषयसप्त
मीएवंचतत्रहलंतादेवविधिरितित्रुटो ऽप्रसंग:यद्वाआमिपरनोयद्धस्वात्दृष्टंतत:परस्यामोनुदिवाक्यार्थ:आवृतोनहस्व

323

२५

शे०टी०
१८६

ग्रहणमेवमानंयद्वाहस्वग्रहणसामर्थ्यात्पूर्वेनुदूपश्चाद्दीर्घइतिशास्त्रमुक्तंचापास्तंतदोहेतिदिगितिननुपूर्ववदत्राप्यनित्यत्वेने
वनिर्वाहोगत आह सर्वत्रेति [illegible] ननूक्तज्ञापकात्तस्याअनित्यत्वंप्रागुक्तमेवेति नसतदभावसाधकोतआहकृताकृतेतितन्मात्र
त्वेनापिनित्यत्वाभ्युपगमात्तत्प्राप्तिःहल्त्वंतरमाह्यायादेतिस्यादिभिरितियथाश्रुतसूत्रेआपादेर्यदार्धधातुकतत्रपरेआयानांनि
वृत्तिरितिपक्षेगुप्तिज्ञुगोपेतिनस्यात् [illegible] गोयांचकारेतिस्यात्।आयादिप्रकृतेर्यदार्धधातुकंतत्रपरेतेषामुत्पत्तिरितिपक्षेपा
गुक्तेष्वसिद्धावपिगोपापोतीष्टंनसिध्यतीत्युक्ताखीकृतेआयादयोवाततःसार्वधातुकेनित्यमितिन्यासतेदसपक्षेगोपापि
ष्यतीत्यादावित्यस्यादिःपरत्वादितिलादेशप्रवृत्त्यसतरंस्यतासीदितिपक्षेइदंतयाचसकृद्गतान्यायेनापादयोन्मसु
रेवेतिभावःत्यवंतस्योक्तावन्वयःनास्तीतिसतिप्राप्तसतिवेतिशेषविशेषत्वकृद्धास्त्वंतदभावेनमवर्त्ततइतिमत्यैतेसनास्ती
तिपर्जन्यवल्लक्षणप्रवृत्तेरितिभावःएतेनशाब्दांतरस्येतिनामीत्यस्या [illegible] नित्यत्वमितिदंड्युक्तंतस्याअनित्यत्वात्तेनैवदी
र्घइतिनामीत्यस्योपन्यासोनिष्फलएवेतिनामीत्यस्योपन्यासोलेखकप्रमादितियदूचुस्तच्चिंत्यमितिमनोरमाचिंत्येतिच
दा

रामः
१८६

ऽऽस्त्र्युक्तं चापास्तं खंडनकारोक्तिं खंडयति प्रतिबिंबितत्तथा सति गौरवमपि प्रकृते तेनेत्यादेरेवं चेति कतेर्नाम्नीतुक्तो चेत्यर्थः प्राप्ते रेवोक्तरीत्या ऽभा

वादिति भावः एतेन नतिस्विति त्यारंभे त्यर्थ इति शास्त्रिदं इ्युक्तमन्यथा चदं ज्युक्तमपास्तं नोक्तमिति उपादीनामव्युत्पन्नत्वे न भ्रंशाच्चेदो ग

षेपि प्रत्यासत्त्यानुडन्वयकनिरूपितांगस्येव ग्रहणेनानंगत्वादनभ्व इत्यादावदोषेपि अक्षुण्णं तदित्यादौ पूर्वत्रैतिनुदो

ध्या ऽसिद्धत्वनच्च तस्यापि संनिपातवद्दाधः उभयबाधकत्वेन तस्याप्यत्वात् शास्त्रबाधापेक्षया लौकिकबाधस्यैवोचित्यात्त्रिस्यैव

वमदोषेपि पूर्वत्रैतो ऽसिद्ध त्वंनच तस्यापि संनिपातेतिवद्दात्पत्व ज्ञापनस्यांगस्येति स्थाने प्रत्यय इति करणपक्षे तेनान्वयस्य

चानापत्याऽनभ्व इत्यादौ दे दोषाते: पदलाघवं युक्तं मात्रालाघवस्य सार्वत्रिकत्वं प्रतिपत्ति गौरवस्य सर्वथाऽप्यत्वमित्येवमर्थेन्वा

च्चेति शेषः। एतेनेच्छापतिग्रस्तं तृदित्यपास्तं [illegible] तत्र ग्रहणे पुंगेपुनः षग्रहणाक [illegible] व्यताप्रतिर्मंडकनुत्यापतिश्चेतिमनसि त्ति।

धायाह षड् इत्येवनितत्रढ ग्रहणप्याहरप [illegible] प्यामितिएवं सति महत्स्त्राघवमित्याहैवं चैतेति सर्वसंग्राहकत्वं तु दुक्तो चेत्यर्थः अपदां

ताधिकारफलमाह पदांतेति भाष्ये इति अनेनापादपरिसमाप्तेरितिमूलं सूत्रानुरोध्येनेति सूचितं· इणकोरिति समाहारद्वंद्वे सौत्रं

शा टी०
२६७

पुंस्त्वाख्यानादिति समुदाये दृष्टा इति न्यायमूलकादित्यर्थः ॥ नन्वेवमादेशापदेपि तत्वापत्तिर् आह सांतेति। रिरौ इति न तस्य तत्र लक्षणे
ति शास्त्रमुक्तमन्यथा मनोरमोक्तं चापास्तं विचारश्च मनिरासायाह विकृतेति लाघवादाह एङःसीति एतेन तत्तो न षत्वमत्र अमुष्येत्या
दौ तु निपातनात्तत्तथा च विश्वप्सास्त्विति प्रत्युदाहार्यं तत्तु लिटूखित्यादिध्यर्थं तदुच्चारणमावश्यकमिति दंड्युक्तमपास्तं विप
रीत गौरवापत्तेः तत्र बीजं ध्वनयन्नाह दीतीति न तथा बहुव्रीहिणा तत्र समुदाये युगपल्लक्ष्यप्रयोगाभावात् आनर्थक्यात दंगेषि।
तिन्यायेनाहावयवेष्विति अत एव अस्मादेव नन्वेवमपि पक्षेस्यादत आह नाप्राप्तेइति सौत्रत्वं विहाय निपातनाश्रयणफलमाह णत्वे
तिएवं च लोकेपीत्यादिः क्वचित्तथापाठ एव न तु विशेष्यासंनिधानालक्ष्यं तदंतविधिर्न वशाद्रूपं तत् अस्याप्तिप्रसक्तत्वादत आ
ह प्रयोजनमिति तथा च गर्भके सत्येव तत्वां गगीकारेणान्यत्रेति नातिप्रसंग इति भावः वार्तिकस्यानपूर्वत्वापाह ज्ञापकादि
ति नन्वेवपनिषेधेन तत्त्वफलमत आह प्रयोगमिति मूलोक्तज्ञापकेनैव निर्वाहे स्वीयवार्तिकोद्धेखप्रसंगं कथयितुं शंकते नन्वि
ति मत्वेइति विरोधेऽन्वयः आश्रयणस्यनकार्यइत्यत्र तथाऽनुक्तत्वादाह सर्वाभिक्रमविवक्षयाऽऽह वार्तिकेति तत्र त्वभगवत्ते

राम
१८७

वत्तवत्तयास्तुचितमित्याहेत एवेति पक्षांतरमन्वर्थरूपं पक्षेषु तेषां मध्ये पूर्वोक्तं भाष्यकारोक्तेरिति पाठः रीतिरन्वयेहेतुः सर्वो त्यतो

सान्वार्थ्य अन्यनिरासायाह मत्येति विसर्गान्त्यः तसिलित्याह त्रलादीतिएते नतथ्यातदर्थे नाननुकूस्त एवगुणेन सिद्धिरत आह दीर्घो

द्वेति अव्यवहितान्वयाश्रमायाह परेति नन्वेवं सर्वनामांतादित्यपि कुतो नात आह तस्य त्विति [illegible] तस्य फलमाह तेनेति इदं सत्रक

त्संमतमेवेत्याह तएवेति तथार्य्योगीकारादेवेत्यर्थः अन्यथा संज्ञापास्तन्नाभावपक्षे ष्यव यवसंज्ञ्यात ततः परत्वाच्छीमाप्त. तदसंग

तिः स्पष्टेवेति भावः आवत्यभावतो लघुभूतमनुत्तमाहांगेति अंगसंज्ञानिमित्तस्यातः परस्य सर्वनाम्नो विहितस्येति सिद्धांतार्थो

तु नद्दोषलेशः अत एव मूले सर्वनाम्नः स्मैड सिङ्योरित्यनयोर्वृत्यारतः सर्वनाम्नइत्येतावन्मात्रमुक्तं तदिति शिलेत्यर्थः सिद्धां

तमाह परेत्विति तदिति नानुबंधकृतमितीत्यर्थः नन्वूकारीत्यानशित्वमत आह तसंज्ञेति हि यतः साज्ञात्यादाहात एवेत्ति योम्पतानिवे

शादेवेत्यर्थः इतीतीमद्वत्येतिशेषः विकल्पोवासरूप इति अन्यथा तदभावेकादेरितिरूत्संज्ञादावन्वयः वंचेतितत्वेत्यर्थः तदसव

त्येतिशेषः ननु तदनं तत्त्वत्वेन तदापतिरेवात आह यस्मादिति विपक्षे बाधकमप्याह यदीति ध्वनितमिति तत्रत्याद्येज्वविका

शे॰टी॰
१८८

रस्पशित्वं कार्यं सवर्णदेशार्थमित्याशंक्य प्रश्लेषेण समाहितं द्वितीये शितत्र उदाहरणमिदमदृशिति प्रागुक्तरीत्यासंसंज्ञकजसःसीतिमिति
~~प्रागुक्तरीत्यास~~ सं ॰स्वंज्ञजसः शीतिप्रतिपाद्योक्तरीत्याऽनेकाल्त्वात्संसाध्यनानुबंधकृतमितिभावः अनतएवेति अन्यथा सुप्सुत
दभावातिक्षादौ तत्सत्वे पीत्वाप्राप्ते रत्सेतदभावाच्च प्राग्दिशीयेऽनित्यत्वेन तत्प्रवृत्तेरिष्टत्वाच्चातदानर्थक्यं स्पष्टमेवेति भावः इति
नेपरिगणनेन अन्वर्थसंज्ञात्वम्प्याह सर्वार्थेति नन्वेवं बहुवचनमेव स्यान्नैकवचनादीत्यत आह सर्वे विश्वाविति अनेकेति बहि
त्यर्थः एकशेषेणाह ॰ताकृशि ति अनुभूतावयवभेदेत्यर्थः तं विनापि बहुवचनमाह यदापीति संज्ञायाः सामान्यसूत्रेणैव सि
द्धेर्गणसूत्रार्थमाह व्यवस्थेति नित्यशब्दोऽवधारणार्थ इत्याहैवेत्यर्थ इति अनेन सजातीयवचनांतरसेबव्यवच्छेदादावादि
कं भवत्येव ॰ भे इति अर्थपरत्वे एवायं नियम इति शब्दपरत्वेऽभादित्यादि भवत्येव रूपे ॰ विशेषस्यास्पष्टत्वादाह भत्स्येतिन्याया
त्स्वार्थ्ये परिपूर्णत्येवं रूपात्वृत्तिसितेइति सूत्रभाष्योक्तात् नन्वेवकविद्दोषोऽत आह पुष्मदिति वचनात् आकारं कारेति वातिका
त् तच्च युष्मदस्मच्छ्रूमान्त्व विषयं नाष्यतये वोदाहरणात् तस्येवेति तत्र सुपः प्रातिपदिकत्वे रेव प्रागित्यर्थः रूपएव विशेषमा

राम:
स १८८

हनवेतिइतिइत्याशयेनननुपाठाभावेदृष्टांतेतावअलादिकमेवकथमतआहहोभादुद्दान्तइतिननुअस्वरितत्वाद्दित्यस्यानुवृत्ता
त्तपक्षविकल्पेनविकल्पासिद्ध्याववाक्यसिद्धिर्नस्यादतआहमंत्रेतिउक्तन्यायस्यतत्राप्रवृत्तेराहपंचेतितद्विषयेच्छतिविषयेस्वा
र्थेतिअत्यंतेत्यादिःअत्रद्वितीयवाक्येननुवृत्तिविषयेतद्विधानेउभयोर्वासद्भावादावृत्तिसंगइतिचेन्नतत्रतन्निमित्तंकिंत्वन्यदे
ववार्तिकसिद्धमितिप्रतिमादयन्वार्त्तिकमवतारयतिअयंचेतिउक्तरीत्यातदसंभवादाहोभयेतिननूक्तरीत्यातदसंभवादाहोभये
तिननूक्तरीत्यातत्रवस्तुतस्तत्परत्वंनैवातआहविषयेतिविषयस्त्वित्यर्थःक्वचित्तथैवपाठःआदिनोभयेदेवमनुष्याइतिसातेद्वितस्मि
न्नयन्वृद्ध्यंस्मृयेतेतिभावःवार्त्तिकमितियत्प्रामाण्यादिदमुक्तंतदित्यर्थःप्रागवदाहविषयेतिपरिभाषाशयेनाहयोगेतितस्यद्वितीयस्य
त्तस्यतत्राप्यगत्यंतरसंभवादाहरूपानुकेतत्संभावनायअभवात्सूत्रमयच्चितभयतइत्यादिवत्तदपोढविविशिष्टस्यसर्वनाकजेवस्या
दपवादत्वादितितस्यप्रक्रियारीत्यातत्संभवोस्तीतिअयचोनप्राप्तिरितिकथंतदापादनंसूत्रेऽनआहायचीतिअपवादोपीतिन्यायेतिए
वंचाकजर्थःपाठइतिभोत्तंसिद्धंतत्रदोषमाहात्रेदमितिनत्वेकमितिन्यायेनाहाकजितिननुसंज्ञोपसर्जनव्यावृत्यर्थंतदतआह

नभीतिइतिस्तत्समासो अग्निमावतरणमाहोभयेयत्त्रेतीति तदितिवार्तिकेत्यर्थः एतेन स्वार्थिकायजंतस्यैवतन्त्रग्रहणमितितिदंडपु
क्तमपास्तं अपिसमुच्चयमेवाहस्वार्थीति अत्यंतेत्यादि एवंचतद्वृत्तद्विवचनानुदाहरणेन्वा। एतेनमिश्रमतेद्वित्वावच्छिन्नपदार्थप्रा
धान्येनभावितितादरूपदार्थद्वयसमुदायद्वयप्राधान्येनमयावितिसाधुरितिनपूर्वविरोधइतिशास्त्र्युक्तमपास्तं एकदेशेषेण।
हावयवेतितंविनाप्याहोद्भूतेतिअस्येतिशेषत्वविवक्षया एतदितिउक्तोदाहरणपरभाष्येत्यर्थः प्रागुक्तेतितयोदाहरणपरभाष्ये
त्यर्थः मूलादिखंडइपतिभाष्येतिमितत्प्रकारमेवाहकथमिति अस्यावश्यकत्वमाहेभयेइतिमुभयत्रसंमतिमाहतदुक्तमितिइति
हैतावित्याहेतीतिग्रहणाकरणेसुडित्याहन्नाहकेचित्एवपाठः प्रप्रत्याख्यातो नत्वलाघवार्थः अन्यथाऽसर्वनामत्वात्तोनस्यातामि
तिभाष्यतात्पर्यमितिशास्त्र्युक्तमपास्तं। उपसंहारपरत्वभ्रमनिरासायाहोभयेति ननुसमुदायस्यैकत्वात्कथमिदमत आहावय
वेतिएकशेषेणेतिभावः संज्ञायास्त्वाएवा। अतएवविकल्पेपितस्यनिमितत्वादिवद्वृद्वंचप्राचांमतेसिद्धांतमाहार्थो अर्वाचांप्रक्रिया
कारादीनांप्राप्तेः सिद्धत्वादाह। भावेतिनिषेधास्येतिविध्युन्मूलकत्वेनोपन्नीततः तेबलीयांसइत्यर्थः अप्युपेत्यदंवस्तुतस्तदविषय

एवेति प्राचां मते नैवाह किंचेति संज्ञामां आकडारीयान्यासं। अत एव सुबुत्पत्तेः पूर्वमेव तत्तत्तादेव नित्यप्रवृत्तुत्तरं मपि विकल्प
प्रवृत्त्यापक्षेतदभावविशिष्टेसाधुत्वं सुबोधमित्याह पूर्वेतिन नुताच्चताकथं तदभावोऽआहांतरंगे इति वा नन्वेवमसर्वेवेपर्य्यो
पतिरत्त आह तदुत्तरमिती ननुविषयसप्तम्यां पुणपत्त्रासंपूर्वविषयत्वमेव आह जसीतीति आदिमानित्यसंज्ञाज्ञास्याः चास
ज्ञायाः तन्नदोषांतरे सिद्धांतमत्तेनाह स्यानिवदित्यादि ननु कार्यकालपक्षे योगपद्यमेवेत्याद्यार्थकासिद्धमित्यस्य विषयएवातआ
ह सर्वेतित्रकेति तासां बाध्यबाधकभावाभावेनन्तदात लत्पाततो विहितत्वेन श्री सिद्धिरूपयेत्यर्थः झीचित्याश्चेति पाठः अत्र भाष्य
संमति माहात एवेति अंतरंगत्वेनानिर्वाह्योभयीति मात्रेतिप्रमाणेइति सूत्रस्येत्यादिः नन्वेवमतिप्रसंगोऽत आहात इति भनुत
यवुत्तयाप्याणिन्यसंमतमिदमत्त आह तयवितिनन्वेवमप्यन्यत्त्रदोषएवातआह द्विर्त्रीति लक्ष्याभावादाहपुंसेवेति तदाश्यः
नन्वेवं महिडेडः स्यवच्चस्य अपि समुदायानुबंधत्वेनावयवानानुबंधत्वात्कथं विलार्यमिति वाच्यं तत्सप्थमिपामित्यामित्यादि
तज्ज्ञाज्ञापकस्य विशेषापेक्षत्वेन तत्र तथ्यांगीकारेप्यत्र तथ्यांगीकारे मानाभावादिति केचित्त वस्तुतस्तु प्रत्याहारघटकत्वान्प

२१

शे·टी०
१९०

ञ्चस्यानेद्विर्भावसत्त्वेदृष्टांतवैषम्येणाशंकैवयुक्ता इतिबोध्यं एकस्तदंतविधिर्मिलाभिमतइतिप्राञ्चास्तुतन्निरासायाह प्रत्ययेतितन्त्रे
षेधाप्रवृत्तेःप्राञ्चांमते ङ्गैनैवतदभावेहेतुमहादंतादितिपूःशब्दस्यतदर्थस्याजन्तएवांतरायांनगर्यामित्यपिसिद्धं केचित्तुदीक्षित
शास्त्रिदंड्यादयःतत्रआस्थानांमध्ये अनार्थैतितत्पुरुषः यथाक्रममाहल्लातेतिभाष्ये इतिज्ञातावेकवचनं एवंचाचीत्यादा
वपिनुक्तक्रमेणाहसाध्येति अर्थेनकर्मधारयःतयोरशाद्दृत्वादाह अर्थेतरइतिनुद्दाहरतिक्रमेणयथेतिकेचिदितिस्वि
तारुचिमाहसर्वैस्येतिप्रकासंरशास्त्र्याद्युक्तव्यस्तपाठासांगत्यायाहस्वामीतिव्यवस्थायामितिविषयसप्तमीत्याह निय
मेनेतितदेवाह सुमेर्वितिलक्षेषप्येवंतदाह दिग्वाचकेति संनीतितयोः संनिहितदेशावित्यर्थः तदितिमध्यान्हेत्यर्थः तदि
तिसर्येत्यर्थः उदयाचलपर्यंतादिरूपेणापाचेस्तदभिधेयस्यतदाकांक्षत्वादितिभावः संनिहितत्वादीतिएतेनदक्षिणपूर्वेत्यत्र राम
पुंवत्त्वंनप्राप्नोतिसमानायामाकृतावभाषितपुंस्कत्वादाकृत्यंतरे चेतीतथ्यादक्षिणापूर्वेतिदिक्शब्दो दक्षिणःपूर्वइतिव्य १९०
वस्थाशब्दो एवंतर्हिसर्वनाम्न इतिपुंवत्त्वमितिदिज्यामितिसूत्रस्थाभाष्यविरोधोनिरस्तः एवंच पूर्वादिशब्दे रेकस्याएवदिश

332

उपाधिकृतभेदस्यप्रतिपादनं तु पाधिश्रेष्ठयथ्वीमध्यंतत्स्रांतचर्तिनश्चत्वारः पर्वतास्तथारामायणेकिष्किंधायांसुग्रीवेणमध्यदे
श । वधिवृसैवदि ।त्वेभागस्योके: पृथ्वीमध्यंचमध्यान्हसूर्यसंयोगिदेशइतिबोध्यंतदादेत्सन्यत्रेतिशद्ध्रलादवितर्ण्ये:
।व्यवच्छेद्यमार्पयाप्रसिद्धाप्रसिद्धसाधारणमाहांतरमितितिनत्रिसर्वीप्रत्याख्यानपक्षेशात्विति आदिनात्वलादियतुणस्त्विदंड्याद
यः विषयसमस्याच्चिकीर्षितेइतिलभ्यतइतितन्नतथासतितद्विषयस्यसमुदायएवसत्वेनतत्रैवनिषेधप्राप्तेप्रियविश्वाये
८ त्यादिलक्ष्यसंभवेचनिवृत्तकपितकइत्यादिमूलोक्तलक्ष्योच्छेदापतेरतआहचिकीर्षितइतिसिद्धांतस्यवक्ष्यमाणत्वादाप्राचीने
तितदाशयमाहनेदमितिकिंचसूत्रेसत्सप्रमस्याबहुव्रीहौकर्तुमिष्टेसतिसर्वादेःसर्वनामत्वेनेतार्थ्यताभाष्येमेवसमुदायस्योष्टत्वे
नबहुव्रीहिरितिवाच्येनबहुव्रीहाविवितिगुरुनिर्देशइतिबोध्यं ~~सिद्धांतमतेनसामान्यमपेक्षितिसत्तमस्यसर्वनामतितिषेधस्यानन्व~~)
(~~नमणवर्णितेनचिकीर्षितेयथाप्रियमात्सामानसंज्ञेतिअत्रैवाहसत्वेइतिअत्रभाष्यसंमतिमाहांतरम्येतितत्सतदर्थत्वादेवत्व~~)
(~~यःतदनुगुणत्वंविशदयन्नाहप्राचामेवेतिसंज्ञाशब्देनचतुष्टयीपक्षेआहसर्वनामपदेतिनामेतिअन्ययात्सर्वाण्यानीतिवक्त~~)

१०

१२१
रा०टी०

~~देत्तसीयेतितत्पदवाच्यार्थः संज्ञायाश्चतेयमसिद्धेतीति पाठः सर्वलोकप्रसिद्धेत्यर्थः तत्वविशिष्टमध्याये नेत्यस्यार्थमाहेकपदोपे~~
~~तिअभ्युपेत्याप्याहरूक्यर्थेतिनरूक्तसर्वार्थवाचकत्वेकथंतदंते ऽत आहतदेतेइनि ममपवनिष्ट सर्वार्थवाचकत्वस्यसमुदाये~~
~~आरोपः उपसर्जनेत्युक्तस्यैवनत स्वमितिनतदारोपइतिभावः उक्तदोषदूषणाभावादाहतदेति अन्वर्थसंज्ञाक्षिप्तेत्यर्थः एतेनेत्य~~
~~स्यार्थमाहतद्धितेति णात्वे इतिप्रायइतिभावः उक्तसर्वदोषादाह केचित्विति प्राचइत्यर्थः एकस्यएकवोध्यस्यायोगार्थस्य~~
~~एवमग्नेपि अत्राचइत्यादिकृतगौरवादरूपं तिति आद्यः विशिष्टविशिष्टपक्षः संनिवेशितात्वोष्टपुटव्यापारस्यहेतुत्वेपि महासं~~
~~ज्ञाकरणस्याहेतुत्वादाह तदनुमानादिति सन्निवेशानुमानादित्यर्थः कृत्रिमोपसर्जनस्यैव ग्रहणमिति भ्रमनिरासायाहात्रेतिवा~~
~~र्तिकेइत्यर्थः अत्रेत्यमेवाविवक्षितमिति भावः नन्वेवंतदोःसः सावितिसूत्रभाष्यविरोधः ततो हि कृत्रिमोपसर्जने एवनिषेधप्र~~ राम
~~तीतेरन्यथासिद्धांतेप्युपसर्जनत्वादत्वसत्वयोरप्राप्तेर्निषेधइत्युक्तिरसंगतैवस्यादत आहतदोरिति अदस एवेति अनंत्ययोरित्ति~~
~~नप्राप्तं तदोःसस्सौततअदसः नियमार्थमिदंइत्यादिः प्रकृतेति महासंज्ञया वार्तिकमत्याख्यानपरत्वार्थः नन्वत्रेति नवसामा~~

सस्य पूर्वपदार्थप्राधान्येऽसद्भूत्पादावत्वसत्वयोरनापतिपरेत्यर्थः प्राचोक्तमसंगतमिति ध्वनयन्नाह द्वन्द्वे चेतीति भाष्यसंमतमर्थ-
माह नवेति सप्तम्येति तृतीयान्तपाठः स्मृतेति तद्विषयन बहुव्रीहौ विहितत्वात्तस्माद्द्वन्द्वे चेर्येण चेत्तापि बोध्यं एतस्य द्वन्द्वे चेत्यस्य खंडनकृद्युक्तिं
खंडयितुमाह किंचेति मात्रपदेन समुदायव्यावृत्तिः तदाशयो भावप्रकाशे प्रतिपादितस्तत्र एवं बोध्यः निषेधद्वयेति प्रयोजनमिति तत्त्ववि गदं ये
धिरिति सूत्रस्य भाष्यप्रामाण्येन तदंतविधाविति शेषः तथा च भाष्यप्रयोगस्य सामर्थ्यात्तदभावकल्पनापेक्षया सपक्ष एवोचित इति भावः
। नन्वनेन निषेधात्तस्य सर्वार्थवाचकत्वमेव नात आहतस्येति अवयवस्येत्यर्थः लोकव्युत्पत्तिसिद्धस्य तस्यानेन निषेद्धुमशक्यत्वादि-
तिभावः यत्तु खंडनकृत्समूहमात्रनिषेधे इत्येद्वंद्वस्थेत्येवं वाच्ये सप्तमीनिर्देशसामर्थ्यात्तदङ्गिनोऽधिकरणत्वविवक्षया सप्तम्यामपि
बहुलक्ष्यसंस्कारानुरोधाद्विद्यमानानीत्यध्याहारेण बहुवचनस्य समूहावयवाभिप्रायत्वेन सर्वादीनीत्यस्य गौरवादनन्वयान्निष्फ-
लत्वाच्चाननुवृत्त्या समुदायस्यावयवानां च निषेधः तयोर्मध्ये समुदायस्यैव प्रदेशिवद्भावेन न निषेधः आधाराधेयभावेऽपि वा प्रदेशि-
वद्भावस्य तुल्यत्वात्सूत्रभाष्यादौ स्पष्टत्वात् तत्फलं च तत्रावयवसर्वनामत्वप्रयुक्तोऽपि नाकज्जातीति तत्खंडयति अवयवस्येति व्या

३१

१९२

शे०टी०

पेत्पुत्तरान्वपि फलाभावइति इतरकशब्देन समासे ऽति भवकानित्यादाविव तत्कृवणस्य दुर्वारत्वादिति भावः मनोरमा पुर्क्तं खंडयति नन्वे
तिसमाहारे इवेतरेतरयोगेपि साहित्यस्य विशेष्यतेति सिद्धांतेनाह द्वंद्वावयवेति एकार्थीभावत्वादिति भावः ननु एवमपि समुदाये
तद्विवक्षासंभवएवात आह समुदायेइति प्रत्ययेनकेन एवंन्वार्थकेवायुक्तेति भावः अतएव अवयवनिषेधे फलाभावादेव सूत्रे
इति पूर्वोन्वयितदेव धनयन्नाह कुनाकेवेति प्रत्ययेनकेनतत्रादोषांतरमाह धेरेति अनेनप्रक्रांतविभाषाजसीत्यनेनगणे। दंतंसे
वृपाठ इति भावः वद्धितितां तस्येति भावः प्राचोक्तं खंडयति एतेनेति अस्यार्थमाह फलेति अस्याप्रस्य कलमाह जसाधारे इतिते
न फलाभावादवयवनिषेधाभावे तत्साहचर्येणार्थाधिकारानुरोधेन चास्याप्यवयवनिषेधफलाभावइति भावः नन्वेवमुक्तरीत्या
सूत्रेवैयर्थ्यमेवात आहाभूतेति इतरेतरद्वंद्वोदाहरणादिति भावः अतएवतत्रतत्सविशेष्यत यावति पदार्थे सोपसर्जनत्वादेवसू एमः
त्रे इति भाष्ये इति शेषः साधकांतरमप्यभ्यत्रस्फुटं समुदायकुत्साविवक्षायां केतु नविकल्पः द्वंद्वस्य सर्वा मशब्द्यमेतेन मंदोक्तमपास्त
मिति स्पष्टं भावप्रकाशे तदाहेति दिगिति उक्तार्थेनाह समुदायेति असंभवादिति प्राप्त्यभावेनिषेधासंभवादित्यर्थः तत इत्यस्या

शे०टी० उपाधिकृतभेदस्यप्रतिपादनंनुपाधिश्चे पृथ्वीमध्यंतत्प्रांतवर्निनश्चत्वारः पर्वताश्चरामायणेकिष्किंधायांसुग्रीवेणमध्यदेशा
३० वधिवस्यैवदिति।ग्वेभागस्पोकेः पृथ्वीमध्यंतुमध्यान्हसूर्यसंयोगिदेशइतिबोध्यंतदाहेतत्पन्नेतिशब्दरत्नादावित्यर्थः।व्यव
छेद्यमापेयात्रसिद्धाप्रसिद्धसाधारणमाहोतरमितिनत्रिसूत्रीप्रत्याख्यानपक्षेशातितिनान्नत्नादियतुशास्त्रिदंज्यादयःवि
षयसप्तम्याचिकीर्षितेइतितम्पतइतिनमतथ्यासतितद्विषयस्यसमुदायएसत्वेनतत्रैवनिषेधप्राप्तौप्रियविश्वायेत्यादि
लक्ष्यसंभवेतित्वत्कपितकइत्यादिमूलंश्लोक्छेपतेरतआहचिकीर्षितइतिसिद्धांतस्यवक्ष्यमाणत्वादाप्राचीनेतित्तदा
शयमाहनेदमितिकिंचसूत्रेसत्सप्रम्यावहुव्रीहोकर्तुमिष्टसतिसर्वादेः।सर्वनामत्वनेत्यर्थत्वाभाव्यमेवसमुदाय रामः
सोष्टत्वेनवहुव्रीहिरितिवाच्योनवहुव्रीहावितिगुरुनिर्देशइतिवोध्यंसु॥ॐनमोभगवतेवासदेवायनमोनमः ३०

537

सिद्धांतमतेनतामाहयद्वेतितस्य उपसर्जनप्रतिषेधस्य नन्वेवमप्यनर्थत्वेननिर्वाहे वैयर्थ्यमेवात आह संज्ञेति अत्रैवाह सर्वेइति
अत्रभाष्यसंमतिमाह्यात एवेतितस्यतदर्थत्वादेवेत्यर्थः तदनुगुणत्वं विशदयन्नाह प्राधान्येनोतसंज्ञाशब्दत्वेनचतुष्टयीपक्षे आहस
र्वनामपदेतिमामेति अन्यथासर्वार्थानीत्येववदेत् सीयतितत्पदवा॰ चोत्यर्थः संज्ञायावृत्तयेप्रसिद्धेत्तीति पाठः सर्वलोकप्रसिद्धेत्यर्थः त
त्रविशिष्टमध्येएतेनेत्यस्यासामोर्थ्य हेकयदोपेति। अभ्युपेत्याप्याह रूढ्यर्थेतिन नूक्तसर्वार्थवाचकत्वकथं तदंते ऽत आह तदंते इति अव
पवनिरु सर्वार्थवाचकत्वस्यसमुदाये आरोपः उपसर्जनेतुतस्यैवनत्वमितिन तदारोप इति भावः उक्तदोषद्वयाभावादाह तदेति अ
न्वर्थसंज्ञाक्षिप्तेत्यर्थः एतेनेत्यस्यार्थमाह तद्दिनेति प्राचेइतिप्रायइति भावः उक्तसर्वदोषादाह केचिदिति प्राचइत्यर्थः एकस्या
कर्वाप्यसूयोगार्थस्य एवमग्नेपि अत्राइत्यादिकृतगौरवादाप इतिति भावः विशिष्टविशिपक्ष संनिवेशोत्ताश्लिष्टपुटव्यापारस्य हेतुत्वे
पिमहासंज्ञाकरणस्याहेतुत्वादाहतदनुमानादिति संनिवेशानुमानादित्यर्थः कृत्रिमोपसर्जनस्यैवग्रहणमिति भ्रमनिरासायाह्नावेति
वार्तिकइत्यर्थः अचेत्वमेवविवक्षितमिति भावः ननु एवं तदोस: सावितिसूत्रभाष्यविरोधः नतोहि कृत्रिमोपसर्जने एवनिषेधप्रतीते

रेत्यर्थः स्त्रीतिव्यक्तिविशेषणं ननुकिंप्रोक्ताणामादायङीषापादनमुताध्येत्र्णामादायनाद्य इत्याह प्रोक्ताण इति नांत्य इत्याह
अध्येत्रिति ननुप्रत्ययलक्षणेनसोऽत आहाणप्योकार इति तदणिति प्रोक्ताणित्यर्थः कस्य ङीयः लक्ष्यानुरोधे नाह स्त्रियामिति अत्रे
वशंकते प्रोक्तेति अध्येत्रर्थगतस्त्रीत्वमादाय तु न शंकात्र तयुक्तेः तेष इत्याद्येव ननुस्त्रियामित्यस्य प्रत्ययमाणविशेषणत्वान्नेद ने
मपिवाव्यावर्त्यमत आह ज्ञापितेत्विति एवंचैतदर्थमस्यावश्यकत्वेन नन्वेवमनुपसर्जनादित्यापि तद्विशेषणं स्यादितिकंतं स्येतद्या थे
वर्त्यत्वमत आहानुपेति अन्यथैतद्वैयर्थ्यं स्पष्टमेव वस्तुतस्त्वेतदंतविधिद्वयसत्वादाद्याणंतादेरिति अन्यथा अस्य ज्ञापकत्वाभा

शे०टी० वेनान्वाय तदंतविधेरप्ययं निवेश इति सोपि न्यायोऽत्र आह प्रत्ययेति सिद्धिः तन्मात्रसिद्धिः अन्यथा तदंतविध्यभावे इत्तस्याप्रस
२६१ र्थः प्रत्ययग्रहणपरिभाषया कुंभकारस्यानणंतत्वेन तत्वेन तत्तोङीव भावे विशिष्टेन ठकोऽभावात् नेवं केवलकारशब्दस्याणंतत्वेपि
भा वो अर्थकृत्वेनाम्नातिपदिकत्वालंभेनैकार्थीभूततया निरूप्यस्त्रीत्वेनान्वयस्य दुर्वचत्वाच्च कुंभकारीति सिद्धिरेव तग्रहणफलं कुतो
नोच्यत इति वाच्यं कारशब्दस्यापि प्रातिपदिकत्वेन लिंगस्य तदर्थधर्मतया च तस्यापि स्त्रीत्वेन योगात् ङीन् स्त्रीत्वद्योते प्रत्ययो स्ततः
सु नच तया निरूप्यान्वयाभावे पक्षे तेरेवं च कारीशब्दे से च स्त्रीप्रत्ययांततया तत एव ठकि कुंभकारीत्यस्य तन्निरूपितांगत्वाभा
वेन कुशब्दोकारस्य च द्विनस्यात् एवं भनिष्टापत्ति रुक्तपक्षे इष्टसिद्धिरप्यस्ति अत एतं व्याख्यास्यातं तत्सूत्रचयनं युक्तं तरमाह कुं
भेमेति ङीपि कुंभकारीत्याकारशब्दमात्रात् अपि स्यात् केवलात् ङीप्यपि अनुपसर्जनस्त्रीप्रत्यये तदादिनियमाभावेन समुदायाट्ठकी राम:
इष्टसिद्धिः समुच्चयः ननु निरूप्येकार्थीभाव एव वृत्तिनिमित्तमिति कुंभे नैकार्थीभूतस्य निरूप्यापत्तेन तदभावात् न कारीशब्दात् तदा २६१
पि ठगत आह निरूप्येकेति समुदायेन तत्त्वे अवयवानिवेति शंकापि तत एवं नेत्याह समुदेति ननुक्तत्वग्रहणपरिभाषयावि

शिष्टादेवङीवितिन पाक्षिकदोषोऽत आह कृदिति फलाभावात् तत्त्वंविषयत्यतिनचेति एतदर्थीति एतदधिकारात् ज्ञापकादेवेत्य
स्यार्थः। अर्थवदितितत्र स्वोक्तेस्यार्थे।। ननुनैस्येति अयंभावः यद्यपि तदादितियमेनाधिकवतन्न्यूनस्यापि व्याप्तिः सामन्यतद्गन्त्रा। त्य
स्पष्टं तथापि प्रकृतेन पसर्जन पसर्जन स्त्रीप्रत्ययस्योदेश्यत्वाग्रहणविषयेत्येतदधिकारसामर्थ्येन तदादिनियमाभावेनाद
ततायाऽधिकस्य संग्रह इति पारमं कुंभकारेय इत्यस्य सिद्धिर्नतु न्यूनस्य मुख्यतत्वकस्य व्यापदेशिवदित्यविषयस्य संग्रह इति कौ
भंकारेभ इति विषये पाक्षिकाष्टः कुंभकारेय इति नेत्यत्रेतेनैव तत्सामर्थ्येन तस्यैव ग्रहणं न तस्यान्यथा तदंतविधिज्ञापने फलाविने भा
तदधिकारवैयर्थ्यस्पष्टमेवेति। अन्यथाऽकुंभकारत्वयानंगीकारे एतदधिकाएदेवज्ञापकादित्यस्य हेतुत्वेयेऽन्वयात् अतएवस
वीते अनर्थकत्वाद्युक्तं एवंद्वैयर्थ्यमितिपाठः एवैं नतांतरव्यवच्छेदः तत्रे तंकेवललकारस्याप्रातिपदिकत्वेन ततोङीबभावेन पा
क्षिकानिष्टाभावः प्रत्ययांतत्वेनार्थवत्सूत्राप्राप्तिवदेकार्थीभावेनेत्यादिमूलोक्तार्थवत्त्वाभावेन गुरुच्चरणोक्तसूत्रद्वय
साधारणार्थवाभावे नचक्तेत्रिन्नुतेति सूत्राप्राप्तेरिति समासे चेत्यादि एकदेशस्युक्तभाष्यानुरोधेनायंग्रन्थः अतएवावयवा

481

७२

ख्या

श०टी०
२६२

दुत्पत्तिरितिभाष्यस्यावसरे कृत्तद्धितेत्यत्र कृद्ग्रहणेत्यस्य संचारेण समुदायप्रातिपदिकत्वात्समुदायस्य चानणंतत्वात्ङीपोऽप्राप्ति
रेवेति शंका किंतु मुचितमित्युपोतोक्तिः संगच्छते एवं च कुंभकारीति सिद्धिरेव मुख्यं तदंतविधेः फलं अत एवेदं तर्हि प्रयोजनं प्रधाने
न तदंतविधिर्यथा स्यात्कुंभकारी नगरकारीति भाष्यं संगच्छत इति अवयवादिति अयं भावः कारशब्दस्याणंतत्वादर्थवत्त्वमस्त्येव वृ
त्त्याऽर्थबोधजनकत्वस्य कल्पितस्य भीतपूर्विकस्य सत्वात् वृत्तिद्वयस्य भिन्नत्वेन तद्धेतुभूतैकार्थीभावस्यापि भिन्नत्वात्सा
रमात्रवृत्तेकार्थी भवेन लौकिके प्रसिद्धत्वस्य सत्वाच्च नहि प्रसिद्धत्वेपि स्वातंत्र्यं विवक्षितं किंच पंचगवधनइत्यादौ पूर्वत्रयाणां व
हुव्रीहौ तदेकार्थीभावेन व्यापके नैव षट्कककार्ये सिद्धे पृथक् तदनंगीकारे पंचपूर्वकद्वंद्वेतो प्रकृतिस्तत्पुरुषमात्रवृत्तेका
र्थीभावेन व्याप्येन समासासिद्ध्यात्तत्सर्वोपस्य भिन्नस्यावश्यकत्वात् उपपदत्वेपि समासविकल्पस्य क्वचित् दृष्टत्वेनोक्तत्वात्। अतएव
व नगरकारीत्यत्रोऽग्निमं अत्र हि तदादिनियमादवयवादुत्पत्तिः स्यात् कृद्ग्रहणेत्यस्यास्तु कृद्ग्रहणादसंचार एव एवं त
र्हीकाएते न समासो भविष्यतीति यद्येवं तत्कृतं स्यात् गतिकारकोपेति समास एव र्हितावं भवतितत्र च कृतेऽवयवादुत्पत्तिरित्यादिभा
न

राम:
२६२

482

षमत्र तंयेन विधिरित्यत्र त्वं वक्ष्यमाणभाष्यं च संगच्छते अन्यथा तयोर्दत्तजलांजलित्वापत्तिः स्पष्टैवे किंच तदनंगीकारे गतिका
६ रकेत्युपपदग्रहणानर्थक्यापत्ते स्वङ्गीत्याऽर्थवत्त्वाभावे नाप्रातिपदिकत्वात्तु प एवामासेरत एवोभयोतेशं किंतु भित्युक्तंव
क्तमिति नोक्तं तस्याः शंकाया उत्तरमिदमेव नन्वेवमपि गुरुचरणोक्तरीत्याऽर्थवत्त्वनाम्या तीति वाच्यं तन्नतथ्याऽर्थवत्त्वांगीका
र एतत्सूत्रस्य गतिकारेत्युपपदग्रहणस्य च गमकत्वेनेतः प्राक् तदनंगीकारः किंतु पूर्वोक्तस्य तत्पदोषात् एतत्सत्वे तु त
दंगीकार इति तदेतत् ध्वनयत्तदेव भाष्यमाह येनेति तदर्थः। भाष्योदाहरणार्थः कैयटोक्तमपि स्वमते एव संगतं न परमते इत्या
ह कैयटोपीति एकाचद्विर्वचनन्यायेन तु नतिर्बहिः समुदायकार्येणावयवानामननुग्रहात् उक्तभाष्यस्य पूर्वभाष्यविरो
धं परिहरति यत्त्विति तिबान्तिकेति द्रष्टव्यं द्वितेनोक्तप्रत्ययविधौ तदंतविधिप्रतिषेधात् स्त्रियामितिरत्यमाणविशेषणाभे
व अभ्महत्पूर्वैत्यादिकविदेव तदविधिज्ञापकं वनोरश्चेत्यादौ कुंभकारीत्यादौ कारशब्दादेव ङीप्रत्ययुक्ते केवलकारीश
द्वाष्ठकुनानभिधानात् अनुपसर्जनस्त्रीप्रत्ययेतदादिनियमाभावस्य समुदायाद्रुमिति एवंचात्रात्यभाष्यसिद्धांतस्तदे

शे०टी० कदेश्युक्तिरेवंचात्रान्याथ्याकेयदादि सकलग्रंथकारोक्तमपास्तमितिस्पष्टीकृतं भावप्रकाशे तद्दाहोध्येते विस्तरइति यथाश्रुत
२६२ वक्ष्यमाणदोषादाह प्रत्येति। नञ्जीविति अन्यथाप्रत्ययलक्षणेन ठगतत्वाद्वक्ष्यमाणाकारांतत्वादोषइतिभावः। ननुनायंटित्
नापिटिदंतोऽत आह टितोऽप्रतिसत्तोऽसत्वादाह स्थानीतिन ननुवर्ण्यवेशिष्यरूपढित्वादेरशास्त्रीयत्वेन कथमतिदेशः; किंचा
नलितितिविषयोजागरूकोऽत आह नत्वपीति अस्योभयत्रान्वयः; ननु कथमस्याप्यासिद्धिरत आह लिङ इति ननु तेषां सिद्धावपिन
त तस्यसिद्धांसूत्रेणाहितस्यविधीयतेऽत आह तद्धीतिचद्धीतिञ्तोवृद्धिरितीत्यर्थः। नन्वंतरं गत्वमेवप्रथमोपस्थितत्वरूपवि
के निगमन्यत आहोतइति एवंतेनन्यत आहोतइति एवंतेन तथाज्ञापनेन ङिति इतीङित्यर्थः। तदादेशइत्यस्येव व्याख्यातात
ङीतिनन्वेवमव्यवस्थापत्तिरत आह। नद्वेतिमूलादि सर्वग्रंथान्दूषयतिपरेत्विति नन्वतरीत्यातत्रापितत्सिद्धमितितद्दसंगति रम:
रेवात आह सर्वेति। प्रतिस्वीक्रियमाणेत्यादिः; द्वितीयज्ञापकमपिदूषयतिशानचइति तत्सूत्रे एवहलःश्नइति सूत्रएवन २६२
तुतावतापिसूत्रमतेतस्यतत्वमेवात आह हेरितिचोद्युक्तमेङित्वस्यतन्नेयोज्य। एवंसतितत्रगमिमाह तस्मादितिसत्ती

त्यनेनवस्तुतोऽनभिधानमेवसूचितंभाष्यद्वयविरोधमस्यपरिहरतियत्तित्यादिनादेशस्यानिवृत्तेनेत्वाद्यभावस्येतिपा
ठ आदिनातिनाप्यादेशेषुपि·त्वाद्यसिद्धिरूपदोषपरिग्रहः·ननुनिरनुबंधकेतूपस्थितिसाशिलापाठःसभायायाःछंद
सीत्येवकुतोनोदात्त्वतमतआहनिरेतितथाभाष्योक्तेरहस्त्रियामितिकस्यतस्यापिप्राप्तसिद्धांतमाहमानजितितन्नउभय
शब्देलाघवणिकीत्यत्राहतदस्येतिठत्रिनिडितिठजित्यर्थःसिद्धेरितितेनेश्वरेत्यत्रनङीपूर्वस्वरीत्यत्रतुपुंयोगलक्षणङीप्रवृत्ते
तेशप्धातोर्वेनोरश्चेतिङी बोध्यः।वैयर्थ्यशंकामादौतत्रजातांपरिहरतितरुणेतिसूत्रेणासिद्धिरितिशणस्त्रियंग्रंथा
सांगत्यायाह्यवरमेइतिपरत्वादिति·उत्कृष्टत्वादित्यर्थः।अपवादत्वादित्यावत् बाधाभावायेतितथाचउभयमपिभ
वतीतिभावः·ननुरूपेविशेषाभावेनङीषेवसिद्धेपुनरत्रग्रहणंव्यर्थमतआहतयोश्चेतिङीप्ङीषोस्त्वित्यर्थः·तमेवोपपा
दयतितावितितरुणतलुनाइत्यर्थः·अथोदेशक्रमेणतस्यप्रक्रियमाहस्त्रीतिचानुकृष्टत्वादुत्तरसूत्रेत स्यग्रहणाच्च
तद्धितेइत्यस्यनानुवृत्तिरित्याहेतीति·ननुपत्न्योकारस्तेऽग्रेयस्येकारपरत्वेनलोपसिद्धिर्यस्येत्यपेस्यानिवृत्तनिषे ।सिद्धे

२३

शे०टी० २६४

पश्चापरानुवृत्तिर्व्यर्थाऽत आहलोपे इति अपत्याधिकारस्याप्यधिकारस्यादित्यर्थे हि पैत्यस्य सिद्धावपि दैवोस्यासिद्धिरत
त आहापत्येति नन्वापत्यग्रहणं कर्तव्यमित्येव वार्तिकमिति कथमधिकारलाभोऽत आह यन्निति तस्य सूत्रत्रये का
रप्रश्लेषेण प्रत्याख्यानपरभाष्यमूलकमाह याख्येति एतेनाधिकारग्रहणपक्षे आभिजितीति न स्यादित्यधिकारग्र
हणं मौलं चिंत्यं प्रश्लेषदैवेत्यस्य सिद्धिरिति दंडिशास्त्राद्युक्तमपास्तं मंडूकप्लुत्या तत्रास्त्रियामित्यनुवृत्त्यास्त्रियां यन्नेवने
ति तत्र ङीसंभावनाया दूरोत्सादितत्वात् तद्रूपसिद्धिस्तु जातित्वान्ङीषेति न तत्र प्रश्लेषः बहुत्वे तु स त्राऽभावेपि तद्रा
जस्येति लुक्सिद्ध इत्याद्यन्यत्र विस्तरः प्रत्यासत्त्या आह्वयज इति सर्वत्रेत्यस्य मध्यमणिन्यायेनान्वयः। अत्र हि वितंडी
त्यत्र हि न नूपदेशग्रहणानुवृत्त्या नात्र दोषोऽत आह षष्ठ इति इदं प्राचां मतेन सिद्धान्तमाह वस्तुत इति पूर्वं प्रारं
भे ननु अविशेषामहिष इत्यादौ फलाभावान्नेत्त्वं टित्वान् ङीपि महिषीत्यस्य सिद्धेः वित्वान्महिषशब्दस्यानोदात्तत्वे नोदा
त्तनिवृत्तिस्वरेणांतोदात्तत्वस्यापि सिद्धेरत आहादिरिती ति। एतेन तस्यात्र सफलत्वमन्याय्यावदंतो दंडिशास्त्रादयः प

राम: २६४

एस्ताः दंडिशास्त्र्यादिग्रंथासांगत्वायाद्दायनइतिफिनइति असंजातविरोधित्वात् प सहकृतादिसर्थः॥ छिनति चूर्णते इत्यपि
वोध्यं तदसांगत्वायान्यथाऽनतिप्रसंगमाहत्वजितिनन्वेवमपि शंखः षंठ इत्यादौ स्यात् तन्न हि फलाभावान्नेत्संज्ञाऽआदेशो णा
दीति आपन्नादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति वार्त्तिककरवज्जनमाहत्वानइतिमेव भवतीति शेषः वाचकत्वापक्षस्य दूषि
तत्वाद्द्योतीति नन्वेवमपि तदप्रवृत्तिः कुतोऽत आह द्विरिति क्वचित् द्वौ ब्राह्मणौ व्यतिक्षुनत इत्यादौ ततस्तदर्थकस
र्वत्रग्रहणं अवदस्तच्छब्दायतुंचाद्विषयप्राप्तं मतेष्फः प्राप्तः। उदीचांमतेङीषत्त्वाविशेषाच्चानुभयोरपि बाधकः स्या
दनंतरेति न्यायाश्रयणात् ष्यस्यैव स्यादिति ततत्वड्यतिनाद्वितिग्रहणात्तत्सामर्थ्यान्न ननु चापिच्छन्नेपि एकारे ष्यस्य पूर्वं
तवत्वेन ग्रहणेन ष्फस्य सिद्ध्या सर्वत्रग्रहणं व्यर्थमेवात आह चापीति सर्वत्रग्रहणस्येह करणं तु वैचित्र्यार्थं यथासंख्यमाह
ष्फाणावित्यादि। एके इति स्वरभिन्नानामिति बहुव्रीहेः शेषः उभयोः फले क्रमेणाहते नेति इति चेति एते न लोहितादिकार्यार्थकत
शाद्वात्प्रागेव शाकलशब्दः पाठ्य इत्यपास्तप्राभेति एतेन मतांतरे शायेन स पाठ इति दर्शुकं सएव पाठः न वामते तु टाप् ङी

१४

रे०टी० षोरितिपाठ्यंस्यादितिशास्त्रयुक्तंवापास्तंकौरव्यसाहचर्यान्मांडूकेत्यपत्यप्रत्ययांतग्रहणंतेनसमदासोकूपमांडूकितवैतावतिकः
२६५ स्मयद्भूतिभट्टिप्रयोगःसमर्थितः।तत्रहिमंडूकस्यायंमार्येतिनस्येदमित्यण्आदिनालौहितेपादेतिनायमितिशाङ्गात
याऽप्रतीतेः।तत्रहेतुमाहयाथीतित्रीणीतितदुक्तंपितारक्षतिकौमारेभर्त्तारक्षतियौवनेपुत्रस्तुस्थाविरेभावेनस्त्रीस्वा
तंत्र्यमर्हतीति।बाल्यत्वमप्यत्ववृद्धभेदात्त्रीणीत्यन्येतदुक्तंआषोडशाद्भवेद्बालोयावत्क्षीरान्नवर्तकः।मध्यमःसप्ततिर्या
वत्परतोवृद्धंउच्यतइतिरिवेतितदुक्तंआद्येवयसिनाधीतंद्वितीयेनार्जितंधनं।।तृतीयेनतपस्तप्तंचतुर्थेकिंकरिष्यती
तिसर्वथापिवार्त्तिकमावश्यकंयौवनस्यप्रथमत्वात्बालकशब्दस्याजादिषुपाठादावेकवचनयापत्रपत्लक्षणेद्वेए
ववयसीतिमतेतुवार्त्तिकंनावश्यकमित्याहुः।उभयत्राहसमेति।अनीकमग्रतापश्चापिपाककर्णेतिसूत्रेसंभस्त्रेत राम:
रन्त्रेश्चेतिपठ्यतेतथापितत्सर्वमजादिराकृतिगणत्वात्एवतात्पर्यग्राहकमितिभावः।अत्रनिषेधसर्वतः।आरोहतः २६५
परिणाहतश्चवर्त्तेन।प्रस्यादिशब्दस्यतत्रैवशास्तिकयहात्।तन्न्वेवमुन्मानेद्विनिष्कीतिनस्यादतआहसुवर्णेतिचेत्तनि

488

षेधः अर्थगतस्त्रीत्वस्य शब्दे आरोपादाह सिद्धेति पारिभाषिकग्रहणफलमाह वेइति वयसिप्रेति सूत्रभाष्यप्रयोगमाह द्विव
र्षेति नन्वेवं कांडादिति वैपरीत्यनिरासाय तत्स्वरूपमाह। क्षेत्रे एवेति एतेन कांडांतादित्यत्र तथा मनोरमामनूद्योक्तं यत्तु शाब्दि
णात् न बिस्तकंबल्यग्रहणे वैयर्थ्यापत्तेरुक्तकोशातयोरुन्मानवचनत्वस्यास्तयमेवे कौस्तुभे उक्तत्वात्। न च द्वौ बिस्तौ
पचतीति उदाहरता न्यासकृता ऽस्य परिमाणविशेषवाचित्वमंगीकृतमिति मिश्रोक्तया नाद्यवैयर्थ्यं। एवमपि द्वि
तीयवैयर्थ्यस्य तादवस्थ्यात् तस्मात्परिमाणमूर्ध्वमानं च द्वयमपि परिमाणशब्देन गृह्यते तेन तु प्रमाणं संख्या कालो
च नैव कांडांतादिति लिंगात्प्रमाणमपि गृह्यं तथा च तस्य विध्यर्थत्वापत्त्या नियमार्थत्वाभावे द्विकांडी रज्जुरिति सिद्धा
वपि तुल्यन्यायतया द्विशमेत्यादावपि ङीप्प्रसंगात् तेषां कोशांतःप्रमाणत्वविलावगमात्स च नेष्ट इति तदपास्तं उक्तयुक्तेः
शमादीनामूर्ध्वाधरदिगवस्थितवस्तुपरिच्छेदकत्वे तिर्यगवस्थितवस्तुनोपि परिच्छेदकत्वे तिर्यगवस्थितवस्तुनोपि परिच्छेद
कत्वेन तिर्यङ्मानत्वेन प्रसिद्धेरसत्वाद्द्विरूपतया द्विशमी द्विशमेति प्रयोगस्येष्टत्वाच्च वस्तुतस्त्वापे लुगप्राप्त्या द्विशमद्वयसी।

७५

शे०टी०
२६६

साद्येवेतिवोध्यं अधिकमन्यतोवगंतव्यं विस्तशब्देनास्य परिमितं सुवर्णंतस्य प्रसिद्धपाकासंभवादाह पवेरिति ठक् इति न
तुटञः अस्य सार्थक्यापाद्य वितइतिमतांतरमाह मित इति अपिना विस्तादिसमुच्चयः आयाममात्रेति तिर्यङ्मानमात्रे
त्यर्थः तल्लक्षणे तस्यैवेते नग्रहणं न तन्मानस्य ऊर्ध्वमानं किलोन्मानमितिएथ्युक्तेरिति भावः पुरुषस्य श्रामादिवैषम्यं तद
सांगत्यायाह पुरुषेति अतएवोराव्रपदं नेतु तेन निषेधः आदिना आधितकंबल्येनितर्त द्विगोरित्यनेन न ननन्वेवं पुरुषस्यकद
पितिर्यगवस्थितवस्तुपरिच्छेदकत्वेनाप्रमाणत्वात् प्रमाणेइतिविशेषणासंगतिरत आहात्रेतिसामर्थ्यादिति भावः मात्रंका
त्स्न्येननु पुरुषाद्व्यस्यजातिवाचित्वं प्रसिद्धमितीदमपिदुर्वचमत आह जानीति अत्रसूत्रे द्विपुरुषीत्यत्र तद्धितलुकीत्य
त्यनुवृत्तिसामर्थ्याल्लुगाक्षेपइति सकलग्रंथासांगत्यायाह द्विपुरुषीतीतिप्रत्ययस्य ठञ्कञ्जोवानुपरिमाणग्रहणात्तस्येवाप्र
भिरत आह तत्र ह्रीतितदस्येतिसूत्रे हीत्यर्थः उत्तरेतिसंख्यायाः संज्ञासंघेतिसूत्रे इत्यर्थः अतएव संख्यायास्तत्रानेन विशेषणं
षष्टिर्जीवितपरिमाणमस्यसषाष्टिक इति सिद्धं मात्रंकात्स्न्ये समासांतप्रकरणस्थत्वेपि अनङ्गेन प्रत्ययत्वं डिःत्वं वैयर्थ्या

राम:
२६६

490

पतेरितिप्राचीनग्रंथासांगत्यायाहसमेतिकवयवादः अतएवसन्न असाख्व्यधिकारस्यत्वादाह तत्रेति। चतुर्थ्यस्येनङ्ङिः यावित्यर्थः
प्रत्ययत्वेप्यविरोधादाहङित्वादितिननु अनङेवादोकथमत आहः समेतिननुमध्येपवादन्यायेनेदंङ्ङा शनिषेधयोरेवबाधकत्न ३८०
त्वनउपेतिङीपस्त स्यपरत्वादत आहानउपेति पूर्वपदेतिवहुव्रीहित्वप्रयुक्तेत्यादिः कुंडोध्नीत्यत्राह कुंउमितिभाष्यकृताऽ १५१
ननुवर्तितत्वादितिदंड्य सांगत्यायाहा सेतिननु भोऽनर्थकत्वमत आहा नितिमूलानुरोधेन कोशस्यासयानयेनमाहङ्गीतिकी
प्रानुरोधेनमूलस्यान्यथानयनमाहवानेत्वसेति वेदेपिनफलमित्याह छंदसिचेति छंदस्यपीत्यर्थः तत्रउभयत्रतत्त्वेवंयोगा
भागविभागोव्यर्थोऽत आह योगेतिलक्षणातरेतिदामहायनांताच्चेतीत्यर्थः एतेनायमपाठः दामेत्यनेनसिद्धत्वादितिदंड्यु
क्तंएतत्त्वक्वचित्सख्यमानं पूर्वेणैवसिद्धमितिसमानमूर्ध्नीत्युदाहार्यमितिशाख्युक्तं चापास्तं। लक्ष्यप्रक्रियाआह्रासमादितिये
येप्रत्यये अभेदोपचारादितिदंड्युक्तेरसांगत्यायाहार्षआद्यंचेतिमध्यद्रूतिनदंत्योष्ठ्यमध्यद्रूत्यर्थः। तत्रङीप्युदात्तनिवृ
त्तिस्वरेणांतोदात्तत्वमेवेत्याहोतामृएभइतिअन्यथासांगशिदामित्याद्युदात्तत्वेङीपितदसंगतिः सोऽपैवनन्वेवंलक्ष्यांतरवि

पो०टी० २८५

रोऽपोऽत्त आह एवमिति भिषजङ्ग्यमित्याणि आदिवृद्धेरपवादोऽस्मादेव निपातनादेकार इति दङ्ग्य सांगतायाह तत्रेति ओषधेर्योगरू
ढइत्यर्थः ततो णंतत्वात् स्त्रियांङीपि भेषजीत्येव मत्वाये इति छंदसीवनिपावित्यनेन अनतिप्रसंगायाह नुगिति। पत्युरन्तयान्त्रमायाह
स्त्रियाइति मुख्यसंयोगासंभवात्तथा व्याख्यातमित्याशयेनाह संयोगेनेति विद्यतेति न तु तुल्ययोगवाची पूर्वसतकारादेशप्रसंगात् अव
यवेति न व्यवस्थावाची वाक्येति प्रसंगात् तदाह व्याख्येति एवं च सह विद्यमानः पूर्वो यस्मिन्प्रातिपदिके तस्येति तदर्थः तत्र तथा
र्थे सति ननु परूपावयव एव पूर्वशब्देन गृह्यतामत आदेवाभीति तथा च सपूर्वेति विशेषणं व्यर्थमेव स्यादिति भावः। नन्वेवमत्र प्र
करणे तत्गृह्यमाणविशेषणमिति सिद्धान्तभंगोऽत आह सपूर्वेति मूलादि खंडयति बहवइतिमोक्तन्यूनतां परिहरति बहु
व्रीजितन्मात्रेत्यर्थः। ननु यत्र संयोगे इत्यस्य संबंधेन च षत्रपुलीति षष्टीतत्पुरुषेप्यनुपपत्तिसत्वाद्यस्तेइति विशिष्योपादानं
व्यर्थमत आह विनाषेति अतएवाह सपूर्वत्वेति मूलादि खंडयति इदमिति। नन्वेवं पूर्वत्र यत्र संयोग इति किमर्थमत आह
पूर्वेति ननु समानएकवीरपिंडपुत्रभ्रातृदासछंदसीति समानादिगणपाठसत्वेन समानपत्यादिष्विति युक्तमत आह मूल

राम: २८७

समानस्येति विशिष्टोच्चारणादिति भावः। नन्वेवमपि तस्योदात्तत्वेन मानमितीष्टस्वरासिद्धिरत आह तेनचोदेतिति पात्तेनेनन्वेतदर्थः
।अपिनास्यैव समुच्चयः। एतेन विशिष्टपाठसामर्थ्यात्सपत्नीपान्विकेत्यादौ पुंवत्वंनेत्यपास्तं नन्वेवं सपत्न्यादिष्विष्टत्वेव युक्तमत आ
ह किंचेति। सूत्रे। फलांतरमप्याह समानत्वं चेति यत्तु पूतक्रतादीनां पुंयोगप्रकरणे वचनमिति वार्तिके तु बहुवचनं कपिंजलाधिकर
णन्यायेन त्रित्वे पर्यवसन्नमिति शास्त्री तन्न तन्न्यायस्येहानाश्रयणात् तत्तत् ध्वनयन्नाह व्याख्यानादिति भाष्यीयोदाहरणमूलकादि
त्यर्थः। संनियोगेतिन्यायप्रवृत्तेराह तेनेति तदन्विति विवृत्वं किमि[illegible] कर्मीरति कोशादेतशब्दस्य चित्रवाकत्वेपि तत एव स्तुकु
पर्यायत्वमिति भावः। मूलादिसर्वोक्तिं खंडयति परेत्विति आद्यमाह तन्नहीति उपमेति सूत्रे हीत्यर्थः। निषिति सुप्सुपेति समासः स
कलं ग्रंथासांगत्यायाहार्षमिनि। अनतिप्रसंगायाह नादेशेति कादेश इत्यर्थः। तत्र प्रवृत्तीति त्रीणि यस्यावदातानि विद्यायोनिश्चक
र्मेचेत्पातस्थैव प्रतीतिर्दर्पशोधने इति स्मरणात् अवदातः सित इति कोशे तु विशुद्धत्वसाधर्म्यादुपनिबद्ध इति भावः। उपमाना
नीति सूत्रे भाष्येति तिरिकल्माषीति जीवतोदाहरणमूलकमाह व्याख्येति अर्चंगविकलत्वायाहाचुदात इति षुनिति इति

११

शे०टी० २६८ पुनित्यर्थः।पित्वस्यावयवेऽचरितार्थत्वात्प्रातिपदिकेतत्कार्यमितिभावः।अंतोदातइतिसरोगोरीयथापिचेत्यत्रफिट्स्वरेणतत्वस्य
दर्शनादितिभावः।तथाव्याख्यानफलमाहसूर्येतितामेवोपपादयतिसूर्येणेतिअत्रांगत्वंङीनिरूपितंबोध्यंइतएवमस्येत्यनुवृ
त्तमपिअंगस्यसमानाधिकरणमुपधायाव्यधिकरणंविशेषणंनसूर्यादीनामितिबोध्यमितिकेचित्ननुवचनसामर्थ्यात्स्याद
तआहवचनंत्वितिनन्वणोलोपएकदेशेतिन्यायेनसूर्यशब्दस्यांगत्वमस्त्येवातआह।णइतिङीनिमित्तकेइत्यर्थः।अतएवो
पधात्वंनत्वेवमप्यणनिमित्तकाल्लोपस्यापितेनैवासिद्धत्वेनयस्यनोपधात्वमतआहाणनीतिउपधेतिअन्यथायांतानांसूर्यादी
नांलोपोऽयादावित्यर्थेनैवैकदेशविकृतन्यायेनसौरीत्यादिसिद्धौसूर्यशब्दस्यङीनिरूपितांगत्वाभावादेवसूर्यचरीत्यादि
याचतौचतद्धैयर्थ्यंस्पष्टमेवएतेषांतत्वस्यतदन्यत्राभावादाहयमेतियत्तुनक्षत्रशब्दमुच्चार्यविहितेणीत्यर्थइतिकश्चि रामः
त्नक्षत्रसंबंधीयोणनक्षत्रेणसंधिवेलेतिसूत्रद्वयविहितस्तस्मिन्नितिअर्थइतिदंडीचतन्नेतिध्वनयन्नाहनक्षत्रेति २६८
आदिनातिष्यसेदंतेषंतिष्योदेवताअस्यतैषमित्यादिप्रत्युदाहरणंतुतिष्यसंज्ञकस्यदंतेष्यमित्यादिननुमातामहश

ह्रस्यो गौरादिपाठादेव सिद्धे पितृव्यमातुलेति सूत्रस्थमिदं वार्तिकं व्यर्थमत आह पिनेति मूलादि खंडयति गौरादिष्विति मातामहश्रा
द्धेति पाठः। कुंडीति अस्त्री कमडलुः कुंडीत्यमरोप्यनुसंधेयः अमरस्य विश्वाविरोधं परिहरति पिठरमिति भावादिति अनुगत
संस्थानव्यंग्यत्वाभावादिति भावः। नन्वेवं मूलासंगतिरत आह स्त्रीप्रीति उक्तं मं तदूषयन् सिद्धांतमाह कमंडल्विति अपि नोक
रीत्या त्वीविषयत्वं मुकुंडन्पालये मानभेदे देवज्जलाशये इति मेदिन्यां कमंडलोरपि जलाशयत्वे न तत्र नपुंसकत्वात्तया स्त्रीविष
यत्वं देवस्य जलाशये इति षष्ठीतत्पुरुषाश्रयणात् अत एवान्यात्वय इति पृथगुक्तं अत एव सूर्यकुंडमित्यादयो व्यवहाराः
पुराणेषु संगच्छते नन्वेवं किमर्थमत्र ग्रहणमत आह सूत्रेति प्रकृतसूत्रमत्रग्रहणं त्वित्यर्थः। तत्फलमाहामत इति ए
तेन मूलादि सर्वपरास्तं वस्तुतस्तु तयोः पर्यायत्वेन मानं पिठरादिचतुर्णामोदनादिपचनपात्रवाचकत्वस्य सर्वमावयनं भांडपा
त्रामत्रं च भाजनमित्यत्र सर्वपदे न पिठरादेः प्रागुक्तस्य ग्रहणे न तत्सामान्यवाचकत्वस्य डमरेणोक्तत्वात् एवं चामत्रशब्दस्य
पात्रसामान्यवाचित्वं पिठरशब्दस्य तद्विशेषकमंडलुभिन्नवाचित्वमिति पिठरःऽन्पालयादौ चामरमेदिनीप्रामाण्यान्नित्य

शे०टी० नपुंसकत्वप्राप्तावपिपिठरेविश्वप्रामाण्यात्स्त्रीत्वमपिअमत्रेतुनित्यंनपुंसकत्वमित्यत्रतेनकमंडलुरूपस्यैवग्रहणंतत्रचोक्ताम:
२६९ मेदिनीप्रामाण्यान्नित्यस्त्रीत्वमेवेतियथाश्रुतमेवमूलंयुक्तमितिबोध्यंमूलेगोणान्येतियस्यापादच्छिंकंनामअभिव्यक्तेत्यस्यपद
कार्यविषयत्वादत्राप्रवृत्तिरिभाव:।नन्वेवंगोणमुख्येतिन्यायान्नस्यादतआहगोणत्वेपीतिननुमुखेएवकुतोनातआहविधिरि
तिविधिनियमेतिन्यायादितिभाव:।।यथाश्रुतेदोषमाहान्यथेतिनन्विदंसूत्र:कथंलब्धमतआहसूत्रेइतियस्यापादच्छिकं
नामेतिकस्यचिदुक्तेरसांगत्यायाहक्रौर्येतिननुस्यलाक्षणिकत्वान्नसूत्रेग्रहणमतआहवृत्त्येतिशास्त्रेवैयर्थ्यंतुनेतिसूत्रयसि
द्धांतमाहप्रतीतिपरिभाषानाश्रयणेमाहप्रतीतिपरिभाषानाश्रयणेमानाभावादितिभावस्यैवेतिप्रथमोपस्थितत्वाच्चेत्यपिबो राम:
ध्यंनन्वेवमनाच्छादनइतिवैयर्थ्यंस्यादतआहानेतिननुवृत्तिमतेनील्या:नीलीगोरित्यस्यैवस्यात्रासिद्धिरतआहनीलेतिवहुव्री २६९
हि:सूत्रेनिर्देशादेवव्यधिकरणोपिसाध्वितिहरदत्तासांगत्यायाह:मैथुनेच्छेति।एतेनयथाश्रुतासंगति:परिहृताअन्यात्
धनादेकंशोणा:कोकनदच्छविदित्यमरादाहशोणेतिप्राचामित्युक्तेराहविकल्पेतिगुणोनेत्यादेङ्रूप:कुतइतिविशो

496

षणात् वचनग्रहणाच्च न च संसर्गिभेदकं यद्यत्सव्यापारं प्रतीयते गुणत्वं परतंत्रत्वं तस्मात्क्रिग्दादतमित्यत्याविशेषण
मात्रं तत्र सव्यापारमित्यस्येतरव्यापाराधीनव्यापारकमित्यर्थः तत्र कुण्ड्यरादीति वाच्यं आखुर्ईदृश्यमित्यादौ क्रियायां चातिप्र
संगात् नापि नैपापिकाभिमतो गुणः मद्दीतायुसिद्ध्यापत्तेर्यतु संज्ञाजातिक्रियान्यशब्दा रूढत्वेन विवक्षिता: चतुष्टयी शब्दा
नां प्रवृत्तिरिति भाष्यपर्यालोचनयात थैव लाभादिति प्राचां वादज्ञ्यादयस्तादयस्तदसहित्याहान्नेति तत्संज्ञेति गुणवचनसंज्ञेत
र्थः तत्र हि स्याकडारसूत्रभाष्ये हि मात्रं कात्स्न्येंशुक्लादीनां गुणगुणिनोरभेदविवक्षया गुणिपरत्वेन न ता तद्धितांतत्वं भेदवि
वक्षायां मतुपोऽनभिधानेन न वा इति कश्योतकरीत्या भाष्यप्रत्याख्यानात् नन्वेवं रूपादीनामपि ग्रहणापत्तिरत आह गुणवेति ता
दृशानां शुक्लादीनां ननु तेषां जातित्वे नैव निरासोऽत आह जातीनिग्रहणेऽपि जाते विशेषणं नन्वेवं कृणादिनिरासो न स्यादत
आह कटादीति कणति शारवाश्वतदध्येतारश्च तद्वाचिनामित्यर्थः वस्त्वर्थे कश्चित्समस्तत्वाद्यथावद्धृत्वादेरिति बोध्यं दृङ्या
दिग्रंथ्यासांगत्यापायाद्दे तदिति लक्षणमिति उपेत्यन्यदिति लक्षणंतरं वेत्यपि बोध्यं यद्यपि स्वयं नदपि तत्परतया योजितं तत

७१

शे०टी०
२०

यापिके पटरीत्या आह वह्नितिन नुस्तोकरीत्या न तत्त्वमत आह भाष्यकृतेति किदिति ति सर्वा धातुभ्य इति नित्यत्वेन ननु
उत इत्यस्याभावे एतदित्यस्याधिकारात्कथमत्राति प्रसंगो ऽत आह्वीत इति नत्वत्र क्रुदिकार इति दुर्वार मेवात आहोणा
दीति अभिमान पदसूचितारुचिस्तु गुत्वाति पक्षे तस्य प्रवृत्ति रेवेति न फलं किंच तदभावे ऽत्र तदसंबंधेप्या नाभावः वार्तिकं तु
नित्यानुवादो नातिरिक्ते इति वदिति तदेवत् ध्वनयन्नाह शुक्लेतीति गुणवचनत्वायाह पतीति हशब्दस्य गुणवचनत्वात्सू
वैणे वसिद्धे प्युतरार्थं विंत्य प्रयोजनं वा तदिशाश्चिदं ज्यादिग्रंथासांगत्यायाह बहुशब्देति उकेति आकडारसूत्रोक्तेत्य
र्थः सर्वत इत्य स्यार्थमाहाकृत इति अपि ताकृतभावामिति वर्तमाने पुनर्वाग्रहणादाह म्येवेतिक्वचित् आदेशादे।
तथा च परिशिष्ट इतो त्ययोदनादेशादकृते रिति वृत्ति रित्यसिद्धिवीजं तु तास्या भाष्ये परिगणितत्वरूपं चेतितुस्व
स्वमतेन च्युतिदोषपरिहाराय सुगंधिरित्यादौ लनभिध्यानान्नेति शाकटिशब्दस्य शाकटवान्नीष्टषो दशादित्वात्साधुः
बहुपद्धतिषष्टिविकटविशालकल्याणपुराणकृपाणखंडकादिकारादतिमः सर्वतो किन्नर्थादित्ये केशाक्तिः शास्त्रेश

एमः
२०

498

त्ति एरव्वीति पाठे शाद्दृद्वयं इतः प्राप्यंगात् चंद्रभागान्नद्याम् अहनिति बह्वादिस्तदाह पुराणेति इतीति स्थितात् ङीपीति शेषः
बहुव्रीहित्वसूचनायाह प्राचइति उपसर्जनतत्पुरुषे तु नास्य प्रवृत्तिरित्यग्रे स्फुटीभविष्यति परपंचम्यभ्रमायाह हेताविति ५०८
नन्वेवं कुतः प्रत्ययोऽत आह ख्यायामितीति अविरोधायाह ख्वेति पुमिति लुप्तविभक्तिकपदाद्वृत्तो भयत्रसंवंध इति आः
दं ङिशास्त्राद्यसांगत्यायाह ख्यानेयेति तत एव तत्पदार्थमोह पुंस्त्वेवेति सर्वं क्यमिति न्यायेनेति भावः अथ सूत्रार्थ दा
माह पुंयोगाद्धेतोरिति संयोगनिरासायाह संवंध इति देवेति अयं हि संज्ञाशब्दत्वात्स्वभावत एव स्त्रियां न तु तदभा
वे कथमत्रातिप्रसंगः उक्तसूत्रार्थो विषयत्वादत आह तदेवेति अपिना तस्यासमुच्चयः तदिति प्रसक्तात्र्यादेरित्यर्थः हरदत्त
दीक्षितादिप्राचीनसकलग्रंथासांगत्यायाह पुंयोगो नेति एवं जन्यजनकभावादिनिरासः भर्तृपापकृतानिति भर्तृ
५०८ कृतपापकृतानित्यर्थः नन्वेवं देवकीत्यादेः का गतिरत आह देवकीति आदिना कुंपीरेवतीत्यादि गौरादिषु पाठाभा क
श्री०५१० वे पितदंतगतपिप्पल्यादेराकृतिगणत्वादाहवोध्यमितीति एके इत्येव प्राचीनैर्लिखिता भाष्यतत्वविदित्यर्थः ॥ एते

२०

499

शे०टी० नगत्स्यतद्वति· अत एव गोपस्य भगिनी गोपीत्यपि भवति: जन्यजनकभाववदीदृशपुंयोगस्यापि ग्रहीतुं युक्तत्वात्। एवं वलि
२७१ पो वर्तमानात् पवनशब्दात् पूर्वेण ङीप् सिद्धे एनुङ्: मात्रं विधीयत इति महत्त्वापवं के पठ्हरदत्तादयस्तु मुख्यार्थाद्य
वनशब्दाङ्ङिपो वितथ्येत स्येदमित्य एवाथ कोङीपि धीयुत इत्याहुः तन्न प्रकरणविरोधात् तद्भद्रादिसाहचर्येण गो
णार्थस्यैव युक्तत्वाच्च। तस्मान्मुख्यार्थकयवनशब्दात् स्येदमित्यणि यावनीति भवत्येवेत्याहुरिति भावोक्तं: प्राचामनुरोधे
नेति बोध्यं: अत एव आहुरित्यरुचिसूचकं तैरप्युक्तं तदेवकानान्वसे इति पार्जनादेवदूतनो ङीपिति देवकस्यापत्यं अत
इञ्संज्ञापूर्वकत्वात् वृद्ध्यभावः इतो मनुष्यजातेरिति ङीषिति· न्वमुकुटोक्तमपास्तं अर्थासंगतेरिति भावः: ननु गवां पाल
क इति विग्रहे कारकषष्ठ्याः समासस्य निषिद्धत्वात् कृतिकारकस्याप्रवृत्त्या शेषषष्ठ्या सुवंतेन समासे आपः परत्वादित्वं दु राम:
र्लभमेवात आपः पात्वादित्वं दुर्लभमेवात आह: गोपेति तदेवाह ण्वुलंतस्येति· तजकाभ्यामित्यनेनेति भावः: इदं च २७१
प्राचांमतेनोक्तं सिद्धांतमाह वस्तुत इति· तत्रापि षष्ठ्यामपि नन्वयत्कमेतत् परिभाषायां प्रतिपदोक्तपरिभाषया कार:

502

काधिकारविहितसंज्ञानिमित्तकविभक्त्यंतस्यैवग्रहणेनतत्राप्राप्तेरत आह यथाकथंचिदिति अत्रत्येति गोपालिकादीनांप्र
तिषेधइतिवार्तिकसिद्धयेइतिशेषः तेषामेवसिद्धयेइत्यर्थेइतीत्यर्थः उपपदेतितत्रहि षष्ठीसमासादुपपदसमासोवि
प्रतिषेधोनेतिवार्तिकं अथवाविभाषाषष्ठीसमासः यदा न षष्ठीसमासस्तदोपपदसमासइतितत्प्रत्याख्यानंचतदोषयेत्य
स्योपेतिसूत्रविहितसमाससंज्ञातत्पुरुषसंज्ञाचस्यासतीत्यर्थः विप्रतीत्यस्यतुनप्राप्तिर्युगपदुभयविहितसमासतत्पु
रुषसंज्ञयोःप्रवृत्तिसंभवेनासंभवरूपविप्रतिषेधाभावात् अन्यादृशाविरोधचदृशाविरोधःसततप्रवृत्तिनिमित्तत्वेमानमि
तितत्तात्पर्येणनचनित्यत्वज्ञानकृतविरोधः कैयटेनोक्तएवेतिवाच्यं शाब्दबोधेबाधज्ञानस्याप्रतिबंधकत्वात् एवंषष्ठी
समासोप्येतद्विषयेनित्यएवफलितः तद्बोधिताभावांशस्यैतद्विरोधेनैतद्विषयेत्यागात् नित्यंक्रीडेत्यादिविषयेत्यस्यक्लृ
प्तबाधकत्वादितिभावः यद्यपिषष्ठीतिसूत्रेसुपेत्यस्यसंबंधात्तदभावेनोपपदसमासस्यांतरंगत्वाभिप्रायकं नवाषष्ठीस
मासाभावादुपपदसइतिउक्तंपूर्ववार्तिकखंडनायतयोर्मध्येवार्तिककृतातथापिपूर्वपक्षसिद्धांतरूपवार्तिकद्वयप्रत्याख्या

K K S U LIBRARY
RAMTEK
441 106
M-1862
Dist. Nagpur

501

शे०टी०
२७२

न परमघवेत्यादिभाष्यं न वार्तिकं न चायुक्तमेतत् उक्तरीत्यादिप्रतिषेधासंभवेन तत्प्रत्याख्यानेप्यंतरंगत्वस्योपपादितत्वेन
तदसंभवादिति वाच्यं परिभाषायां गितिकारकोपपदादित्यत्र च सामान्यतः कारकषष्ठ्युपादाने न प्रतिपदोक्तपरिभाषायाः
अनित्यत्वाद प्रवृत्त्या स्वरसतस्तयात्यर्थालाभेन च कारकविभक्त्यं तेन समासमात्रस्य सुबुत्पत्तेः पूर्वमेव वक्तुमिद्लौभा
त्तथ्यात्त षष्ठीसमासोपि तथैत्वं तस्य नास्तीति न दोषः एतेन कारकतद्विशेषमात्रयोरुपादाने एव परिभाषाप्रवृत्तिरि
त्यपास्तं तस्याविध्येकवाक्यत्वाभावेन विप्रतिषेधादिशास्त्रवत्कार्यव्यवस्थापकमात्रत्वेन नन्वोपादाने न एवेत्यर्था
लाभाच्चेति दिक्। स्पष्टं चेदं परिभाषेंदुशेखरादौ ण्वुलंतपक्षेप्याह यद्गतदिति तज्जकेत्यर्थः तत्रापि ण्वुलंतपक्षेपि सूर्यो न्ने
त्येव बाध्यमित्याह निषेधेनेति एवेन चापूर्वविधित्वैयर्थ्यनिरासः इयमित्यस्याधिक्यं निराचष्टे सूर्यस्येति अनतिप्रसंगायाह त
द्योग एवेति महत्वादियोग एवेत्यर्थः अत एवेषामित्युक्तिः वहद्वइत्यनेन प्राप्तुतमान्योक्तनिरासः वार्तिकस्यचन्निधिस
त्रस्थत्वादाह पत्र इति तत् तदेव ध्वनयत् अर्थैतीति भाष्यपुस्तके क्वचित् दृश्यमान इत्यादिः यद्यपि भाष्ये स्वार्थो इति न पठि

राम:
२७२

तंतदापितदभिमतमित्याह्यात एवेति एतेन वृत्त्यनुसारेणेदमित्यपास्तं अतएवामरसिंह आर्याणी स्वयमर्योस्यात् क्षत्रियाण्य
पिउपाध्यायान्युपाध्यायी स्यादाचार्यापि च स्वतः आचार्याणीति । पुंयोगे स्यादर्यी क्षत्रियी तथेति ननूक्तप्रकारेवेंद्राणीत्यादेरपि
सिद्धाविंद्ररूपेति सूत्रं व्यर्थमत आह सूत्रत्वितिमिवेतितथ्याचतः पूर्वमिवांतरंगत्वादापि अदंतत्वाभावान्नङीषिति भावः । केच
व इत्यनेन सूचितारुच्यासकलग्रथ्यासांगत्यापसिद्धांतमाह ऽयमिति अन्नमानमाह्यात एवेति · ततस्तदनित्यत्वाभावा
देवेत्यर्थः एतेन बहुलग्रहणस्यैवमानत्वान्नमानमित्ययुक्तमित्यपास्तं नन्वेवमंबांबेती सूत्रेगवादिग्रहणव्यर्थं गोरित्यादौ सुपि
स्यइति केनया सुबुत्पत्तेः पूर्वसमासे सात्येतिनिषेधाप्राप्तो आदेशाप्रेत्येवसिद्धेस्तत्रहिस्यइतिप्रतिपदो परिभाषयासुपि
स्यइतिविहितकमत्यर्यांतानुकरणं पंचमत्यर्यांतानुकरणमत आह्यांवांबेतीति एतेनोकारीत्यागवादिग्रहणमेव तदनित्य
त्वेमानमित्यपास्तं पदस्यादिरिति पक्षे तस्यतत्वसंभवेपि पदादादिरिति सिद्धांतपक्षे तस्यतत्वासंभवाच्च अत्रानेइत्यने
नारुचिः सूचिता तत्त्वीजंतु परेंतइति सप्तमीसमासपक्षे गोन्वेत्यादेस्तदनित्यत्वं विना न सिद्धिरिति केचित् पदे इत्य

८२

श०टी०
२९३

स्यपदत्वयोग्योपलक्षणत्वेन तत्सिद्धेरयुक्तमेतदिति परेतदाहेतिदिक् इतियद्यपि कांतादित्यस्य वक्ष्यमाणरीत्याक्तार्त
त्वादित्यर्थः संभवति तथापि [illegible] तथापि संभवात् प्रकारांतरम् आह हाक्रदिति कांतस्यत्वावृत्ते राहास्येति ङीषेवत्वा
स्य द्योतकः ननु अल्पत्वस्यात्र गतत्वात् कथं तस्य समुदायोपाधित्वमत आह करणेति तदल्पत्वे सति तद्विशेषणस्याप्यल्पत्वस्या
वश्यभावित्वेन तस्य तत्वाक्षते स्तदाहकियेति परिभाषायां कृतम् अकृतत्वर्थे निरूपितकारकत्ववतो ग्रहणात् पूर्वोक्तपरिभाष
याऽन्यानिर्वाहादाह कांतानादिति एतेन तथाव्याख्यानमपास्तं तथात्वे स्तोक्तपदकात परं निष्ठेति पूर्वनिपाताभावेमानमाह
जातीति वक्तुं श्रीहिरत्वेनेत्याह नख्यांगमिति एतद्याख्यानफलमुक्तं रसूत्रे इत्यर्थाधिकारानुरोधादत्रैवमिति सूत्रयन्नाहोत
रेति तत्र उत्तरसूत्रभाष्य उक्तमित्यत्रान्वयः नोत्वर्थे यत्र पाणिनिना तरंतमदंतप्रातिपदिकमित्यपि बोध्यं रूपपूर्वेति रानेनसां
गादित्येव सिद्धे पूर्वपदग्रहणमपुत्रार्थमिति सूचितं एवं च तन्नतदनुवृत्तोन्त्यपुत्रहतीत्यादाववेनेनङीषिति के पदस्य तदुपपा
दकर्दंड्यादेश्चासंगत्याह पुत्रादिनीति अत्रैवाहा सांगादिति ननु फलसत्वे इदमयुक्तमत आह किंचेति उत्तरार्थत्वं चप्रा

राम:
२९३

कुत्सितमेवेति पुनरत्र नोक्तं एते न तद्विरुद्धमिदमित्यपास्तम्नूतीति तदावश्यकमिति शेषः समासप्रेति निषेधनिरासमाह तदंता
दिति शास्त्रीयोपसर्जनत्वमस्तीत्याहेहैकेति लौकिकमप्यस्तीत्याहाभेति शिखेतीति अन्यथाटापंबाधित्वायक्षेङीप्स्यादिति भावः
विशिष्टे दावंते तेनैव समासात्। अत्र भाष्यविरोधं परिहरति यदपीति। एतेन अनेन निषेधफलाभावेन लाघवादाहेवं चेदमिति
तथा च लक्षणांतरमिदमित्यपास्तं। एवं च लक्षणद्वयमेव एतेन लक्षणत्रयमितिदंड्याद्युक्तमपास्तं असमानप्राणिसंबद्धविषयकत्व
मित्युक्तं स्पष्टयितुं शेषमाह प्राणिनोपीति स्वांगत्वेनेति पाठः मध्येयदीत्यपाठः। अग्रेनेवेदित्यस्य सत्वात्तेनेत्यस्याव्याख्यातज्ञेत्यादि
तथ्येत्युक्तिलब्धमाह प्राणीत्यादि तदर्थमाह प्राणीति शेषमानमाहात एवेति। अस्य तदन्यविषयत्वाद्वैवेत्यर्थः। भाष्यीयपाठमाह
तस्यैवेदिति करणस्य शेषत्वविवक्षया षष्ठी तुदादौ कुड निमज्जन इति धातोर्माधवोक्तानुवादो मूले इत्याशयेनाह द्वावंताप्य
मिति तेन समासे उपसर्जनह्रस्वत्वेऽदंतत्वात् प्राप्तिः क्रोडादौ टावंतमात्रस्य पाठात् कुंजानरवचनक्रोडप्रोद्धेन बहुव्रीहौ स्वांग
लक्षणो ङीष्विकल्पो भवत्येव कल्याणक्रोडी कल्याणक्रोडाह रदतस्वरसाप्येवं केवलेत्यनेनरूढिनिरासः अन्ताभयंनेत्याह न

२३

शे०टी०
२७४

स्वात्येवेति राक्षस्याम पीतिभावः। नांदीमुख्यो मातर इत्यत्र तु ङीषेव नांदी कर्म समुद्दिष्टन्मुखत्वेन तदातृत्वेन योगेन तत्र तद्रूढप्रवृत्तेरसं
ज्ञात्वात्। किंच सर्वत्र शास्त्रे संज्ञापदेन पौरुषेयसंकेतितस्य केवलरूढस्याग्रहणेन तत्र च तस्येश्वरसंकेतस्यत्वेन योगरूढत्वे
नवा अतत्वात्। अत एव दिक्षु विश्वेषां देवानामित्यादौ न सर्वनामत्वमित्याहुः। मूलं तात्पर्यार्थमाह एवं चेति उभयत्वेऽत्वे त्वेत्य
र्थः। असमिति वृत्तिकृत्त्वे तेनेति भावः। मूलादि दूषयन् सिद्धांतमाह परे त्विति। एवं च तयोस्तदनुवृत्तेर्न अत एव तस्य स्वार्थत्वा
देवच्छन्दिदस्येति आद्येन बोधनपतामशिम्बीत्यत्रेत्यर्थः।। अस्त्रीत्यादि वैय्याघ्र्यापत्यास्वरूपग्रहणं शंकेवनेत्याहाज्ञा
तीति भिन्नेष्विति तत्त्वित्यादिः। तयोर्निमितमित्यर्थः। जातिरिति द्व्यस्येति शेषः। लक्षणांतरमाहः नित्यमिति तत्र गुणे सामा
नाधिकरण्येन स्त्रीत्वौचित्यादाह सामान्येऽद्भुति संस्थानमाकृतौ मत्याविति कोशोक्तसंस्थानपदार्थमाहावयवेति आदि
नाआकृतिदर्शनं विशेषणदानेन निर्वाह इत्याह समानेति। तद्विनापि निर्वाहमाहावस्येति तदितिदिहत्यर्थः।। तामेवान्व
यव्यतिरेकाभ्यामाह स एवेत्यादि अत एवेत्यस्यार्थमाह पंचेंद्रोपेति। अपिनाकल्पभेदेन दुर्गाशरीराणां भिन्नत्वेन समान

राम:
२७४

506

कालिकत्वाभावेनाजातित्वसमुच्चयः एतत्तटस्थं एवंकृतलक्षणमात्रांगीकारे आदिनाब्राह्मणत्वादिः आदिनाक्षत्रियादि
ब्राह्मणादौ शिखायज्ञोपवीतादेरपि तुल्यत्वात्‌ तस्याः वृषलत्वादिज्ञानेःणात्वेतिपाठः अतइति अतोलक्षणांतरम
प्याहेत्यर्थः॥ मूलेत्वोभिन्नक्रमइतिसूत्रयत्तदर्थेघटितमाहेयमपीति अनेनमूलेसुग्रहेत्यस्यसुग्रहापीत्यर्थः सूचि
तः इति इत्यर्थैतिर्ग्रंथस्येत्यंतमिदंलक्षणमितिसूत्रयन्नाहाख्यानमिति अनुवादनिरासायातदनिराशायातदर्थमा
हेयति सच ब्राह्मणात्ब्राह्मण्यामुत्पन्नोयंब्राह्मणइत्यादिरूपः अस्यापितन्त्वनातिप्रसंगइत्याहेकेत्रेति तथाजा
तिः नन्वेवमपिब्राह्मणत्वादेर्जातित्वंनस्यात्‌ तस्योपदेशगम्यत्वेप्येकत्रकथिते ऽन्यत्रसुग्रहत्वाभावात्‌ एवंचब्राह्मणी
भार्येइत्यत्रजातेश्चेतिपुंवत्वनिषेधानापत्तिरतः आहब्राह्मेतिः चुरुक्तेवैलक्षण्ये आदिनापितामहादि एतेनवृषलीप
र्यंतध्यानमूलेब्राह्मणत्वनैवजातिरितिभ्रांतिर्निरस्तातस्योपलक्षणत्वात्‌ यत्तुयुवत्वादिकमाकृतिग्रहणमपिनजाति
नित्यत्वाभावादनएवद्वंद्वेत्यादौनजीपृथुवज्जानिरित्यादौपुंवद्भावश्चयुवतितरेत्यत्रतुज्याप्सूत्रभाष्योदाहरणमा

507

माण्पान्नपुंवत्वंतांत्रिकोकनित्यत्वादेरप्यत्रपेक्षणादितितन्नःभाष्यविरोधादितिध्वनयत्यथाभाष्यंतथाहात्रेतिअन
योर्मध्येइत्यर्थः।अतएवाहापरेतिउदेतिवृद्धेत्यादौलजाद्यावितिबोध्यं।एताभ्यामपिलक्षणाभ्यांक्रमणाहानुगतेतिकठः
कठीकठमिदंकुलंऔपगवंकुलमितिदर्शनेनासर्वलिंगत्वाभावादाहसर्वेति।अपत्याधिकारादन्यत्वेनात्रतेनापत्य
मात्रग्रहणं।तथायूनिलुक्सूत्रभाष्योक्तेरवंतीकुंतीतिभाष्येऽनंतरापत्येउदाहरणाच्चातएवतथाव्याख्यानमितिदी
क्षितदंड्याद्युक्तेरसंगत्यायाह'शास्त्रीयमितिअपत्यंपौत्रेति।सूत्रोक्तमित्यर्थः।अत्रभाष्यसंमतिमाहातएवेतिअ
त्रेतेनतद्ग्रहणादेवेत्यर्थःसंगच्छतइत्यत्रान्वयःअतएवतदुक्तिरपिसफलाअन्यथापत्यामित्येववदेत्।न्यासक्रमे
णासूत्रभेदउक्तेसतितदंतविशेषणत्वेतदंततातस्यापिविशेषणादनुपसर्जनाधिकारेवैयर्थ्यापादाहेतिप्रोक्त्यापूर्वपक्षी
त्यादिअन्यथामूलोक्तपक्षेनतुसिद्धांतेचरमेकोदोषोऽतआहग्लुचुकितिङीप्त्वपुंवत्वप्रतिषेधश्चतयोरित्यर्थः।अतए
वअपत्यविशेषस्यज्ञातित्वादेवएवमर्थासंगतिमुक्त्वातत्रदोषमप्याहकिंचब्राह्मइतिउपसंहरतिअतइतिषष्ठी।

औचित्यान्वयेन नन्वेवमनुपसर्जनादिति सूत्रभाष्यविरोधोऽत आहान्तरेति नन्वेवरीत्या तत्रापि स्यादिति पूर्वीमभा
ष्यासंगतिरेवात आह प्रनित्विति यथाश्रुतासंगतेराहायत्स्यं पोत्रेति त्राखार्थ्यग्निति द्वंद्वः चरणान्नाद्वः कूठाद्रिषु त्रा स्वाभेदेषुत्तदः
ष्यापि पुरुषेषु चेति प्रकृते उभयोरपि ग्रहणमित्यनुवादो चरणानामित्यत्र कौस्तुभप्रदमं जयोस्तत्खंड यतित्रा खेति कठी
तान्क्रिं प्रक्रियामाह कठेनेति तु कूरूति तु कृ पहृचीत्यत्र त्याक्रियामाह वक्यु इति न तु स्त्रीणां युए कतमेषु नाम्नां णामोतीव धनमि
षत्ते अध्यायनं त्वेवदानां सावित्राव त्वनं तथ्येति ममोक्तेः पूर्वकल्पे तत्सखेपि नेदानीमत व आह स्त्रिपाद्इति एतेन वहृचीत्यस्य शाखे
तार्थः॥ अतत्त्वव कृत्वाव ध्येते यैवेत्यस्य निर्मूलत्वादिदमयुक्तं अनन्वोमाराव के वहृवाश्वरणा रव्यापामिति भाष्य विरुं अर्थान्तरेत्त
योः माधुता यत्ति र्मो ण वकन्नारत्र पोर साधुता यत्तिष्व वहुत्वन्नाद्र सप्त्कचि द ध्येतरि प्रयोगास्तु भ्रमक इति रत्नाकारो तक स संपो भाष्यार्थे।
नवर्वा धात्र शारवापां पुंयोगादिति ङीष् सिद्ध स्तत्राख्वीविषपता भावाच्च मुवत्तस्यापि भाषितपुंस्कं त्वाभावात्प्राप्सि स्थेतिदिकसिद्धं
तलक्षणांत्रो आह परे त्वित्याघादुरित्यंतेन। सर्वसंग्रहा पाद्यो धुपेति तत्मात्रमित्यर्थः। तदाहाकृतीति तत्र तयोर्मध्ये गोरिति

८५

शे० टी
२२६

पाठः गोरिति पाठे त्वेषामभिप्रायः विनिगमनाविरहादाह यद्वेति नन्वेवमग्रिमवैयर्थ्यमत आह लिंगानां चेति एतावानन्तराद
इत्यर्थः। तदिति ज्ञातोऽत्यर्थः वाचकमिति पाठः अनुवादफलमाह तेनेति अनुवादेनेत्यर्थः। यंगविकलतानिरासाय
हैकत्वेपीति एकत्वमिति मतेपीत्यर्थः। अत एव ज्ञातेरसर्वलिंगत्वादेवाप्रकृतोपयोगापाहाविष्टेतित टादेः सर्वलिंगत्वा
दाहृतं चेति केचित् सांप्राञ्चाः सिद्धांतमाह माहभाष्येति नन्वेवं कोन्यासस्य यतिरत आह तदमिति नन्वेवमप्यन्तरं
किमर्थमत आह सकृदिति कथमित्यत आह सकृदिति प्राग्वदेव अतिदेश एवऽ अतस च पूर्ववत्तया योगिकादे
वत्तोप्रादुर्भावविनाशौ इति एतावन्मात्रं तस्य फलितार्थमाह यावदिति अनेन एकत्वलक्षणेन आकांक्षाशांतयेत्येषमा
हद्रव्येणेति सहार्थयोगे तृतीया। गुणैरिति प्रकृत्यादित्वात्तृतीया।। अस्यपतासर्पमाह यथेति प्राग्वदाहेदमिति भ्रमं निराचष्टे
त्रेति एवमप्यवच्छेदमेवाह नत्विति संभवेप्याहानुपपेति अत एवडक्तरीत्या पूर्वत्रैकत्वस्य सात्वादेवमेवेति अन्यथा तदसंगतिः
स्पष्टोवत्तस्यज्ञात्यभिप्रायत्वं तत् गतिकगति रत एवान्यदपि मानमाहात एवेति पूर्वत्रैकत्वलक्षणत्वादेवेत्यर्थः वाचीति अत

एमः
२२६

एवनित्यस्त्रीलिंगः नन्वेवमप्याद्यप्याघे स्त्रीविषयत्वेमस्त्येवात आह स्त्रीति एतेनानुक्तरीत्या न तस्याः स्त्रीविषयत्वे न कोशेनाम्ब
ताख्येऽस्मत्तरांवा। योगार्थाग्रहणे नरुषोक्तरीत्या स्त्रीविषयत्वादेव अन्यथाऽक्तरीत्याऽस्त्रीविषयत्वानंगीकारे तेषामपि पाका
द्युत्तरपदानामपि[illegible]णीकुठीत्यादयो गौरादिषु बोध्याः शेसाव्राद्रः परिमाणे युमानगवादन्यांस्तु कुटवाद्राघटेयुमानगेहे स्त्रोपा
नगद्दो भाजनसामान्येऽर्थेन्वादिः भाजनविशेषे स्त्री अन्येणादिके छू निषित्वान्ङीषित्यपि बोध्यं भाषातु प्रोषात्कन्विघदस्त्रीवि
षयमित्यर्थरूपं पक्षांतरमाश्रित्याद्रोणात्पादयः साधिताः मालावलाकयोस्त्वजादित्वाठात् सिद्धमित्युक्तं एवं च पाककर्णेति सूत्रं
नकार्यमिति तद्भावः अत्र पक्षेऽस्त्रीविषयादित्यस्य प्रत्युदाहरणमन्वेषणीयं कुलीने त्यत्राजादित्वादापूर्वी द्यः द पीति पूर्वसूत्रे
णसिद्धे स्त्रीविषयार्थमिदमिति भावः। नन्वेजात्यर्थमेव किं नात आडाजासेति सूत्रानंतर्यस्याविशेषादवांतरानंतर्यग्रहणे
दृष्टासिद्धे दोषाञ्चानंतरस्येति न्यायेनानिर्वाहादाहाप्रागिति निषेधात् तदारंभात् अन्यथाऽनुवृत्त्यैव सिद्धेराह पुनरिति ननुति
तिरिः ककुभोलावइतिसाहचर्यात्पुंस्त्वेनास्य स्त्रीत्वाभावात आह स्त्रीपुंसयोरिति इदमुपलक्षणं नपुंसकस्यापि अयोगव्यवच्छे

शे॰रि॰ दार्थत्वात् अत एव गोत्वं चेत्सप्तावतरेणेनन विरोधः तत्सैकदेइपुक्तित्वाद्धृतिबोध्यं। बहुव्रीहाविति ब्रह्मवेदो वंधुष
२७० यस्य न तु स्वस्मिन्नित्यर्थः मनुष्यजातिविशेषरूढोपसृष्टं चेदं भाष्यकैयटयोः परेति अंतरंगेणेणि सः कवितिविशेषिके त्यर्थः
नयुरेते पदकत्वाभावान्न घृतश्च त्सप्राप्तिरेव न एतेन ब्रह्मवं धूक इति तङ्कं तावयव को बहुव्रीहिरिति न युत्तरपद लक्ष
णः कथम वत्येवेति। शास्त्रयुक्तमयास्तदीर्घोच्चारणं श्वसृश्वरा रञ्चार्थमितिदं यापुक्तेरसांगत्यायास्सश्वसूरिति लिंगविशिष्ठ
परिभाषयास्वादय इतिन्याशास्त्रिदं पायुक्तेरसांगत्यादाहैकेति यथाश्रुतासंपतेः प्रग्वदाहा ध्वर्युश्रोति ननु सत्वत एव तत्त्वं वंधे
र्थमिदमत आहोत इति पूर्वे पथ्यपरिहरतियंस्त्रिगिकारस्यतत्सैप वतेनायाकाम्यवृक्षेदः न्त न्वस्यापर्ख त्वे नायुक्तमेतदत्त
आहतन्निर्देशेति अत एवाह भाष्येत्विति मूलादिसकलग्रंथासांगत्यामाहृषाविवितीति अत इति पूर्वपदस्योपमान राम॰
वाचित्वाभावात्तद्योयमानत्वे न प्रतीत्यभावादिति वृत्त अत एवोत्तरपद ग्रहणं सफलं अन्यथोर्वजादित्येव वंदेत्न्या २७०
फेतित्राकः खुरेगवादीनां मूलेविटपिनामपीतिहमद्योन्त्यात संस्त्वंन्नाफल्कीवेखुरः पुमानिति अमरात्पल्कीवत्वम

पि अत्तसवन्नाफाविवृजंभुराणेतिश्रुतिरपि तस्य खुरत्वसन्ना फत्वस्यवात द मूलकश्रारोपोनत्वन्नतत्प्रतीतिस्तदाहेवंचे
तितथारोपे चेत्यर्थः। सः उपमानोपमेयभावः। एतेनोपचारेपि फर्षपदस्योपमानवाचित्वमव्याहतमेवेसंद्रोक्तमपा ५२८
स्तं एवंचकरभोरुत्वोदेप्यारोपविवक्षायामज्ञानमवत्येव एतेन बिंबकरेण करेणं करोरुभिरितिमाघोव्याख्यातः
पीवरोरुप्रिपिवतीववर्द्धिएणइतिकुमारप्रयोगस्तु चिंत्यएव एतेन संज्ञापूर्वकेति गुणोनेति ततसिद्धिरितित्राह्विदंपाधुक्तमे
पास्तं तस्याज्ञाप्रामाणिकत्वात् वाध्यवाति ॥ केमूली त्याद्विती पपक्षं समूलमाह सहेतितन्न दृष्टा तमाहकमेतिमूलेकडुरि
तिकुत्सितो वृक्षविशेष इत्यर्थः। वृक्षविशेषस्य संज्ञेयमिति कश्चित् कमंडलुशब्दस्यैतुषांजातिवचनः अतएवचतुष्याभ्द्य
इत्यत्रकामंडलेयइतिवक्ष्यतियात्रवाचीतिनस्त्रीलिंगइतिन च तुदाहरणं अत्रोयोङकारइतिपाठान्नायमाह शार्ङ्गेतिअ
५२८ सञ्जत्रः समानाधिकरणं विशेषणं विनिगमनाविरहात्प्रहातद्धुदिति अतएवबाह्वाकोकेतियज्जुश्शंगरुवादूदपत्येणिआ
दिवृद्धोर्गुणयोङी पित्वशान्ननिवृत्तिस्वरेणं तोमात्रलेप्याप्तेङीतविधिरितितन्नङीपबाधित्वापरत्वापरत्वात् ङीष्।

८७

शे०टि०
२७८

प्रोप्तिस्तदाहस्त्राङ्कुरव्यामिति। अत्रत्याङ्करवादौ असस्त्वीत्वमागममरादित्यत्रप्रतिपादितं। ननुतत्स्थानेनबाधःकुतो
नातआहतातीतितत्रप्रयोगेएवंचतितस्यणाडीषरावबाधकमिति भावः। अतएवकिंमरीणांनरीणामितिप्रयोगःसं
गच्छतेमत्तादिसकलग्रंथखंडपतिवस्तुतइति अथैनेहेमेपिनेत्याहरुन्धेति अत्रमानिस्त्वयत्राहातएवेतिङ
करीत्याऽर्थभेदाभावादेवेत्यर्थः इत्यत्रइत्यादौभाचांमतेष्यसत्वोसहाद्दोदीचामितिसिद्धः कौञ्जादिषुनपाठःका
र्यइतिपाठः नन्वेवंगोकक्षीपुत्रइत्यत्रष्यनुःसंप्रसारणमितिनस्यादतआहसंप्रेतियनसिद्धानास्येदेफलमित्यरुचिः
केचिदिसेनेनस्यन्वेताइतिस्त्रीप्रत्ययाः॥ ॥अव्यवहितसंगत्यभावाद्व्यवहितसंगतिमाहस्वौजसितिप्रथमावकारकविभक्तिस्त
दधिकारायादिति प्राचीनग्रंथ्याःसंगत्यायाहेदमपीति। अपिनातदधिकारस्यसत्वविहितसंज्ञाहेतुकविधिसमुच्चयः
ततइति अग्रइतिशेषाः आस्तिभवंतीयरइतिमाष्यार्थंमाहास्तीतिसर्वत्रविशेषक्रियाभूत्येरइतिशेषः अतएवतिङसमानाधि
करणेप्रथमेतिवार्तिकसंगतिः ननुप्रथमाद्यार्थेस्यनसाक्षात्क्रियायोगोऽतआहस्वौर्य्यैः अत्रमानसाहप्रथमावेति अतएव

रमः
२७८

क   णाः   क्य

तितद्धपटकृप्रत्ययार्थेः अत्रमानमाहप्रथमांतेति अतएवेत्यादिः अस्याःप्रथमाःभाष्येऽनभिहितपादेतत्र अत्रसर्वसगत
हापकात्ताहर्मीवकेप्राचिदयु [illegible] इतिसूत्रभाष्याहान्वमेतिनतत्प्रतिसंधानेत्यर्थःसिद्धांतमाहनूरा तेतिशंकानिवारणमाहतरादी
तितद्धाच्येतितरादिवाच्येत्यर्थः तस्यवस्तुतस्त्वेपत्राहात्वमेतिमाहैमवधारणेइत्याहतिंगसेवेति आर्घर्थ्यमाहक्रमेणे
तिनन्वेवंवीरःपुरुषइत्यादौप्रथमानस्यादितिशंकतेयद्यपीतिस्कारेतिप्रथमारूपेत्यर्थः भावेतितद्रूपसंसर्गेणोत्सांगेवीज   स्वपे अभेद
माहाभेदस्तित्विरहोत्रिरइत्यादावौपाधिकभेदेनव्यपदेशाविभ्रावेनषष्ठ्यपपादनस्यार्थं त तत्सूत्रभाष्येकतत्वात्अधिकंमंजू
षाभाप्रकाशयोःस्पष्टंतदाद्धानत्रेति। ननुन्यायोव्यभिचरितोद्वौब्राह्मणावित्यादावतआहप्रातीतिकेवलप्रकृतिप्रयोगा
भावाद्विभक्तौत्वनिय [illegible] माप्तत्तिरितिगूढकृतअतएवसिद्धतानायमाहानत्विनेतिएकेत्वादौसंगिकेकवचनेभतिर्वाहाहवाहि   रा दा
भ्यइतिसर्वविभक्तीतिसर्वप्रथमेत्यर्थः मूलेमूलनंतापरिहरतितिलिंगेतिउन्मानेतियत्नंचतमित्यादावित्यर्थःमूलादिसकला
सांगत्यायसिद्धांतमाहपरेत्वित्यादिनाइद्दुरित्यतेननानात्रेतिसूत्रपन्नाहात्रसूत्रेइतिसचतदाश्रयघ्वततत्प्रवृत्तिनि

८८

प्रा०टी
२७१

मितं ज्ञापितं तस्यैव समन्वये अत एव लिंगस्य प्रातिपदिकार्थत्वादेव अत्र सूत्रांतरविरोधं परिहरति तस्मादिति एवं न
पुंसि विद्यमानस्यत्रासद्रूपस्य चावृत्तिः वार्तिकविरोधमपि परिहरति अभिहित इति प्राचोक्तं खंडयति एतेनेति व्यक्त्यर्थे
नाविरोधेनेत्यर्थः तत्र च वार्तिकमते तु तटादिस्थले लिंगं न प्रातिपदिकार्थो ऽत आह तटादिति न मात्रात् कुत्सादिवदप्र
तीतेराह पूर्वमिति विभक्तेरिति भावः। ननु ततो निष्पभेन बुद्धिस्थता ऽत आह नियमांश इति एतेनावशिष्टस्याभिमतत्वं सू
चितं इदमेव वृत्तिकारसंमतमित्याह इदमेवेति न च एवमपि न्यूनता ऽत आह सत इति तथापि न्यूनतैवात आह आश्रयस्थि
तिद्धान्ते पर्यवसितमाह रावं चेति तेन तयोर्ग्रहणे चेत्पर्यर्थः क्रमेण तयोः स्वरूपे आह ग्रापतिनन स्त्रीत्वादेन प्रातिपदिकं ततो
लिंगाधिक्यमपि नेत्यर्थः तत्रात आह लिंगेति अत एव प्रातिपदिकार्थे किमुदाहरणमिति प्रश्ने स्त्री पुमान् नपुंसकमिति भाष्ये उ
क्तं अन्ये सर्वे कुलः स्त्रीः ज्ञानतटः तटी तटमित्यादयः कुमारीब्राह्मणीदोषस्यैव नहि तत्र लिंगं प्रवृत्तिनिमित्तं किंतु विशेष्यविशेषणभावे
वयं धर्मप्रकारीकृत्य वृत्तिग्रहस्तस्यैव प्रवृत्तिनिमित्तत्वात् पदेषु वक्ष्यमाणेति न लाक्षणिकेषु दोषस्तदेतदभिप्रेत्य परिमाणोदाहरणमा

रमः
२७१

516

हरणमाह द्रोणत्वादीति तच्छेपताः विशेषावच्छिन्नपत्वादिपरिच्छिन्नधान्यादिपरिच्छेदकत्वसमानाधिकरणखण्डोपाधिरूपा धर्मोऽजा
तिविशेषो वास्तु भाष्यप्रामाण्येन तथैवानुभवेन लाघवेन च तादृशस्य तस्यैव प्रवृत्तिनिमित्तत्वस्वीकारादिति भावः चण्याय इति
धर्मितावच्छेदकत्वेन धर्मितावच्छेदकसमानाधिकरणत्वेन विशेष्यत्वेन वा ज्ञातिः न हि विषयस्य बोधविषयत्वांगीकारान्नातिप्रसंग
इति धर्मितावच्छेदकत्वेन धर्मितावच्छेदकसमानाधिकरणत्वेन विज्ञातस्य परिमाणस्य तन्न्यूनादिर्गामात्राधिक्याभावादित्यवबोधनेनैवं
द्रोणः परिमाणमित्यादिनस्यादत आह द्रोण इति अभ्युपेत्येदं वस्तुज्ञो नैवमित्याह द्रोणेति मूलोक्तप्रकारेण परिमाणसाध्यैक्यखण्ड
पतिमूलोक्तमिति ननु वार्तिकानुरोधात्समानविभक्तिकनाम्नार्थयोरन्वय एव साधुत्वमिति न्यायदोषोऽत आह किं चेति यत इत्या
दिः तदनुरोधादभेदान्वय एव साधुत्वमित्यर्थस्या[illegible]गीकर्तुमुचितत्वादिति भावः केपद्येक्तमन्यथा तत्साध्यैक्यखण्डपतिर्न चेति सिंह इति
एवमपीत्यादिः तद्वदिति तन्न सदृशस्य निपत्तोपस्थितिकत्वेन स्वार्थे पदसंस्कारेणैव लक्षणयेति भावः इदमभ्युपेत्य वस्तुतस्त
देवनेत्याह निपमान्नेति निनुमाति पदिकार्थादिषु विहितप्रथमायास्त्वनुवादकत्वेऽपि संख्यारूपार्थबोधकतया सार्थकत्वेन घाणादि

छि

ण

२१

शे०टि० भ्यस्तदुत्पन्नावपिएकादिभ्योनस्यात्तत्संख्यापा अपृक्तत्वात् उच्चैरादिवदेकवचनोत्पत्तिश्चेत्तद्धारावपितस्येवापत्तिः सर्ववचनोत्पत्ति
२८० र्वास्यादत आहेकइतिअन्यथावचनग्रहणाभावेएतद्विषिप्रातिपदिकार्थेतात्पर्य्यः अत्रप्रातिपदिकार्थ्यसूत्रे ननन्वेवमपिरामाविसा
स्पा दौप्रथमानस्यात्लिंगा[illegible]धिकेपिसत्वात् वचनग्रहणस्येकार्थेचारितार्थ्यादत आह रामावितिकर्मत्वादिपोग्यत्वरहितेएकत्वा
दिविशिष्टस्वा[illegible]रामवेत्सेवमेकवाक्यतयानियम[illegible]भागीकारात्तदाधिकेमवत्वेचेतिभावः। मात्रग्रहणमात्रग्रहणाभावेत्वितिनि
यमःस्यादित्यत्रान्वयः नचकर्मण्येवद्वितीयेतिप्रत्ययनियमेकर्मत्वादिविशिष्टकुवारणांर्थ्यं तद्वितिवाच्यं अत्रापिप्रातिपदिकार्थेवे
तिनियमादस्यतत्राप्राप्तेस्तएवाहयचेतितास्नानेतितदभावसमानाधिकरणेतत्पर्य्यःरामम्गेपिअर्थान्तरसैवप्रथमात
तीयाधत्तार्थसैव अर्थान्तरस्यद्वितीयांतार्थस्यअव्याप्तिर्लक्ष्यमाद्रात एवेतिनाद्यसम्याख्यावर्तमादेवे स्सर्थःवोधेपीतिअ राम:
१ तएवाववडादितिसूत्रेपादानमुत्तराणिकारणिवाधंतेगांदोग्धिपयः अत्रपरत्वात्कर्तुमितिभाष्यसंगच्छतेतदुहेस्त्रांतःस्थि २८०
तइवद्रव्यविभागानुकूलव्यापारानुकूलव्यापारार्थःग्रामादायातिग्रामंगच्छतीत्यादौतपोरवकाश्रइतिभावःइदम

का ग्र त

518

ये स्फुरी भविष्यति दृष्टांतमुक्त्वा प्रकृतमाह तथेति अनेनापि प्रातिपदिकार्थेति सूत्रेणापि अनेन नियमेन प्रातिपदिकार्थत्वाभावस्समा
नाधिकरण्यांतरस्य व्यावृत्तिः स्यान्न तु तत्समानाधिकरणकर्मत्वादेरित्यर्थः इष्टापत्तावाह एवं चेति तथा नियमे चेत्यर्थः तत्रा
पीष्टापत्तावाह एवं चेति तेभ्यस्तदनुत्पत्तौ चेत्यर्थः निरूपातस्येति वार्तिकं तु स्वरादिप्रवर्त्तनेन सफलमिति भावः ननु तत्सत्वे क
र्थं निर्वाहोऽत आह तत्सत्वे त्विति मात्रग्रहणसत्वे त्वित्यर्थः कर्मत्वाद्यूह्यन्ताक्ति । परः कर्मत्वादियोग्येत्येतदर्थः तत्सत्वे
द्वितीयादेरेवजापमानत्वात्तयोग्यतानिवेशः तद्वदितीति कर्मत्वादियोग्यत्वरहिते प्रातिपदिकार्थे एवेत्यर्थः न्दूतार्थ्यो
तद्गूतार्थकस्य सयनियमात् । तथा चानेन कर्मत्वादिसमानाधिकरणप्रातिपदिकार्थस्यैव व्यावृत्तिर्न तु निरर्थकस्य तस्य तथा
स्यार्थकप्रातिपदिकत्वाभावात् तथा च तत्र प्रथमो समासात् कृत्वा स्वप्रवृत्तिर्युक्तेति न निरर्थके । निष्टं तदाह न दोष इति ननु त
दृष्टांतेनात्र तथा नियमः उक्तस्तत्रैव च तथा नियमे किं मानमत आह इदमेवेति अन्यथोक्तिरीसाऽस्यैव पर्यंस्य स्पष्टमेव व
न्वर्थे नियमेनेदं सुवचमत आह मा चेति च स्त्वर्थे भाष्याद्यसंमतत्वादाह सत्वेति नन्वेवं भाष्यविरोधोऽत आह तदेतिमा

१०

ध मिति अत एव

शे॰टी॰ त्र्यग्रहणे तात्पर्यः । एकत्वमात्रग्रहणं संबोधने चेति सूत्रे लिंगादिग्रहणं च भाष्यमतेन न कार्यमिति बोध्यं तदाह स्पष्टं चेदमिति सि
२८१ द्धांतमतेनाहतत्रेति प्रातिपदिकादितद्धितात्पर्यः । हरिसंमतमाह संबोधन एवाह संबोध्यते इति असा । अनुवादविष
यत्वादेव रातन्मूलक एव संबोधनकर्मकारकत्वव्यवहारो वृद्धानां तस्यैव तत्त्वपदार्थत्वेन विनियोज्यक्रियाकर्तृत्वात्
अत एव तिङ्समेति वार्त्तिकमते प्रथमासिद्धिः संबोधने अधिकं मञ्जूषादौ स्पष्टं अत एवेति प्राग्वत् इहत्रापि वर्धसे
तिभा गवन्तत्वार्षं अत्र मते तस्याग्रहत्वं पाध्येत्वात् त्र प्रकारं वमेवेत्याह मिमुखीत्वे ड थमाह प्रवर्त्तनेति निन्त्वे व व्रजा ति
नीत्पादौ वेत दसंभवे न तत्र निपातासिद्ध्या हरिर्गन्तव्यासंगतिरत आह व्रजानीति परमतेनादूषणमिति सिद्धांतस्तत्वन्य
त्रस्पष्टः तत्र त्वानिसमानेति लौकिकोक्तात्स्वच्छसास्त्वात् अन्येवमपि तिङः तद्दूयसत्वेन तन्नियामक पारिभाषिकैकवाक्यत्व रामः
स्याभावात् तदसिद्धिरेवात आहैकेति वहुव्रीहि एक्रूपमाणासमानानुपूर्वीकेति ङः तद्घटितमित्यर्थः इदन्नपि मासीनरीत्या २८१
पि वैकवाक्यत्वस्याभावात् तदसिद्धिरेवात आहैकेति वहुव्रीहिणा श्रूयमाणसमानानुपूर्वीकेति ङः तद्घटितमित्यर्थः

520

इदमपिप्राचीनरीत्यावस्तुतोवाक्यैकदेशान्वयेनतएव [illegible] बोधइतिनस्मर्यमाणत्वविशेषणाप्रयोगइत्यन्यत्रस्पष्टमितिबो
ध्यंनदोषःनिघातासिद्धिरूपःनन्वेवमप्युद्देश्यत्वलाभःकुतोतत आहोद्देश्येतिननुकोसौव्यापारो।तआहभातिननुएवं
व्रजानीत्यत्रकथंलोट्ज्ञानस्यैवविधेयत्वेनात्रविध्याद्यसंभवादाहप्राप्तेतिप्रैषेतिसूत्रेण [illegible] अतएवअस्पत्तिमानया
देवएवंचपदत्रहरिकेपरदीक्षितादिभिरन्यथोक्तंतच्चिंत्यमितिस्पष्टंमञ्जूषादौतदाहेतिदिगिति॥ ॥इतिप्रथ
मा॥ ॥प्राचीनसकलग्रंथासांगत्यापाकर्मणोनिमित्तस्यब्राह्मणस्याकथितंचेतिकर्मत्वापत्तिस्तच्चसूत्रेप्राप्ताप्राप्तानत्वा
घविवक्षायांसर्वथातदप्राप्तौचप्रवर्तनंतदुत्पत्येप्यस्पष्टीभविष्यतिअतएवतस्यतदपत्वादेवएषांकारकाणांतद्वोपपा
दयतिक्रियेतितस्याअन्यथाकांक्षानुभमाकांक्षासत्वापाहक्रियापाइतिननुकथमिदंसर्वेषामित्यतआहसर्वेषांचे
तिपत्तुक्रियाजनकत्वेनकारकत्वंनकारकत्वंफवोदाहरणेपत्रस्यकारकत्वाभावापत्तेस्तंविनाप्रम्यक्रियायाअनि
ष्पत्तेस्तस्यापिजनकत्वमितिचेत्तथापिसंप्रदानेप्राप्तिरविद्यमानसंप्रदानकस्यापिदानस्याजायमानत्वेनतस्यानियतपूर्व

वस्तुनोभीष्टत्वेनाक्षिप्तक्रियायामेवसाकारकषतिवाच्यम्श्रौतक्रियामादायत्येवयुक्तत्वात् घटेदृत्यादिप्रागुक्तदोषदूष्या
पतेश्चएतेततश्चिर्भोगमितिन्यायेनतत्प्रयोचितमितिपंकजादिवचोमस्तिमितिचनिरुक्तरूढपरीकारफलाभावाच्चेतिप्र
त्रसंमतमाहसर्वेत्वमितिअतएवाहकर्तुरितिपुनर्बुद्धिमदत्यादाहमनिरितिव्याप्तिनिरासायाएवसिध्यन्वेति।पस्तु
कर्मत्वादीतात्र्यवृत्तिदोषोया।धिकरणत्वाकारकाधिकाराच्चकेनासुमिष्टमितोकांक्षायांश्रकृतधातूपात्तव्यापारेणतस्य
ध्वम्पतेतत्याचानुगमगामीतिसत्वस्यनत्वोक्तरीत्यासकोयमानाभावेवचफलानुकूलव्यापारेणसंपूर्णोधात्वर्थेनपदीक्षि
तेतंडलादितदेवकर्मसंज्ञंभवतीतिसत्रार्थइतिनयफलवत्सकर्मत्वमितिकश्चितनव्यकरणाकृतेर्वेनापत्तेनफलानुव्यापार
सैवकर्तेत्यादौवेविशेषणतयाप्रविष्टत्वेनतसैवकरणत्वेनान्वयोचितादितिमामास्तदेतदभिप्रेत्याहकर्मेपदार्थःतिकर्मत्वा
दीनांक्रियापृथिवत्वात्प्रधानाभूतधात्वर्थव्यापाराश्रयरूपत्वादित्वासंभवेनानन्वयापातिश्चनचपानभोजनास
नमोगाद्यर्थमेववस्तुनोभीष्टत्वेनाक्षिप्तक्रियायामेवसाकारकषष्ठीतिवाच्यम्श्रौतक्रियामादायैवयुक्तत्वा

१२

श्रो०टी० २८३ त्पचेदृत्यादिप्रागुक्तदोषदूपापत्तेश्चरतेनरूढिर्योगमितिन्यायेनतथात्वेनमितिपंकजादिवद्योगरूढिरिचनिर
स्ततद्भूम्नर्थंगीकारेफलाभावाच्चेति मत्रसंमतमादृसार्थंचेदमिति अतएवाहकत्वरिति पनर्बुद्धिपदग्रहणादाग्र
हमतिरितिचामिनिरासायाहासिद्धान्तेतिपत्तुकर्मत्वादीनांत्वादविशेषापीप्सितत्वात्कारकाधिकाराच्चेक
नाप्रमिष्टमिसाकांक्षायांप्रकृतधात्पात्तव्यापारेणात्पर्यादन्यतेनतथाचानुगवंगामीतिसूत्रस्यमूलोक्तरीत्यासां
कोचेपानाभावेनचफलानुकूलव्यापारेणासंपूर्णधात्वर्थेनपदीप्सितंतंडुलादितदेवकर्मसंज्ञंभवतीतिसूत्रार्थ इति
नफलस्याकर्मत्वमितिकश्चित्तत्प्रकरणच्युतेर्वलायस्त्वेनफलानुपव्यापारस्यैवकर्तृत्वारीरविशेषणतयाप्रविष्टत्वे
नतस्यैवकरणत्वेनान्वयोचित्यादितिमान्यास्तदेतदभिप्रेत्याहाकर्तृपदार्थेतिकर्मत्वादीनांक्रियोपाधिकत्वात्प्र राम: २८३
धानाभूतधात्वर्थव्यापाराश्रयरूपेत्यादिःप्रकृतस्यैवोक्तकर्तृत्वपदार्थेविशेषणीभूतक्रियाःफलानवच्छिन्नत्वेनैवोपस्थि
त्वात्तस्याएवकरणत्वमितिभावःतत्रहेतुमाहोपतिकरणच्युतेरित्यनेनतुल्यार्थोपत्यापःतथाचाधिकारप्राप्तकारकप

523

दलभ्योक्तार्थस्य वहिरंगत्वादेकसूत्रोपात्तकर्तृपदलभ्यस्य तस्यांतरंगत्वेन प्राबल्यात् तत्कर्तृत्वेनान्वयमिति भावः
ण तेन कर्तृग्रहणं व्यर्थं ईप्सितेत्यनेन तदाक्षेपात्तद्वारणार्थं नामिसादाविव प्रत्यासत्त्या प्रकृतधात्वर्थद्वारकसंबंधेनैव
पत्क्रियेप्सिततत्सेव कर्मत्वेन न माषादावतिप्रसंग इति तदर्थमपि तन्मास्त्वित्यपास्तं एवं च कर्त्री स्वनिष्ठव्यापारेणाप्सं
वं धुमिष्यमाणमित्यर्थः संबंधश्चात्र जन्यतारूपो जन्याश्रयतारूपश्चेष्यमाणत्वं च तद्व्यापारोद्देश्यत्वमेव सनागभित
मिदं च साक्षात्फलरूपेयात्वर्थे किं पापाफलेच्छापूर्विकेच्छाविषयत्वात्तत् दाश्रयत्वात्तद्गत्वादेरपि तत्त्वं जन्यत्वं च जन्यत
ज्जन्यसाधारणं अत एव चैत्रे ग्रामं गमिषतीत्यादौ ग्रामस्य कर्मत्वं फलसंबंधश्चाश्रयतातदभिप्रेत्य फलितार्थमाहैवं जिग
चैतितस्य तत् द्वारकत्वे चेत्यर्थः ण्यंतसंग्रहाणाह प्रयोज्येति अव्याप्तिं निराचष्टे फलस्यापीति तसत्वमाह एवेति तस्य
पितत्वादेवेत्यर्थः। तामेवान्यत्र निराचष्टे तत्प्रतिसूत्रे लिंगवचनमतंत्रमित्युक्तेरदोषादन्यथोक्तौ। किमिदं कारकदूत्सं ति
ज्ञानिर्देश इति अयं भावः उक्तहेतोरेवान्वर्थेयं संज्ञा करोतीति निर्वर्तयतीति कारकं किमिति साध्याकांक्षा पाक्रिया

२१

शे०टी० यायएवञ्चाहृतःसाध्यत्वेनप्रतीतिःक्रियैवतत्त्वेनसंबध्यतेनतुद्रव्यादिकरोतीत्यादिपदांतरसमभिव्याहारेएवतत्सातथाप्रती
२८४ तान्नाद्वात्तथाऽप्रतीतेःतथाचक्रियानिवर्त्तकमुद्दिश्यकारकइत्यनेनैवसंज्ञाक्रियतेनतुविभक्त्येकवाक्यतया
महासंज्ञाकरणसामर्थ्यादितिध्रुवमपायेइत्तियोगविभागंकारकपदानुवृत्तिंचविनासूत्रद्वयसामर्थ्यात्पर्यायेसिद्धे
ध्रुवमपायेइतियोगविभागेनतत्रकारकइत्यनुवृत्याच्चप्रतिवाक्यंकारकसंज्ञाविधानसामर्थ्यात्समावेशार्थमव
श्यंत्वयाप्यनर्थत्वंस्वीकार्यमन्यथाग्रामस्यसमीपादायातीत्यादावतिप्रसंगःकारकादिसंज्ञापाःएतेनसतिनामनुपा
दानात्कथंतेनसंज्ञाविधानमित्यपास्तंसमावेशफलंतुत्वनुपदमेवग्रामेइतिस्फुटीभविष्यतीतियावत्स्यात्क्रि राम:
